अनन्त पद्मनाभ व्रत पूजा

http://www.mantraaonline.com/



अनन्त पद्मनाभ व्रत पूजा

Check List

1. Altar, Deity (statue/photo),

2. Two big brass lamps (with wicks, oil/ghee)

3. Matchbox, Agarbatti

4. Karpoor, Gandha Powder, Kumkum, gopichandan, haldi

5. Sri Mudra (for Sandhyaavandan), Vessel for Tirtha, Yajnopaviita

6. Puujaa Conch, Bell, One aaratii (for Karpoor), Two Aaratiis with wicks

7. Flowers, Akshata (in a container), tulsi leaves, tulsi garland

8. Decorated Copper or Silver Kalasha, Two pieces of cloth (new),

9. Coconut, 1/2 kg. Rice, gold coin, gold chain

10. Extra Kalasha, 3 trays, 3 vessels for Abhisheka

11. Betel nuts 6, Betel nut Leaves 12, Bananas 6, Banana Leaves 2, Mango Leaves 5-25

12. Dry Fruits, 5 bananas, 1 coconut - all for naivedya

13. Panchaamrita - Milk, Curd, Honey, Ghee, Sugar, Tender Coconut Water

14. Puja Books

१ At the regular altar

ॐ सर्वेभ्यो गुरुभ्यो नमः ।
ॐ सर्वेभ्यो देवेभ्यो नमः ।
ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥
प्रारंभ कार्यं निर्विघ्नमस्तु । शुभं शोभनमस्तु ।
इष्ट देवता कुलदेवता सुप्रसन्ना वरदा भवतु ॥
अनुज्ञां देहि ॥

At the श्री अनन्त पद्मनाभ altar

---

२ आचमनः

द्विराचम्य

ॐ केशवाय स्वाहाः. ॐ नारायणाय स्वाहाः.
ॐ माधवाय स्वाहाः.

(Sip one spoon of water after each of the above three mantras. Take a little water from the vessel for worship with an offering spoon onto the palm and sip it. This is called achaman.. Just as bathing causes external purification, partaking water in this way is responsible for internal purification. This act is repeated thrice. Thus physical, psychological and spiritual, internal purification is brought about.)

ॐ गोविंदाय नमः . ॐ विष्णवे नमः .
ॐ मधुसूदनाय नमः . ॐ त्रिविक्रमाय नमः .
ॐ वामनाय नमः . ॐ श्रीधराय नमः .
ॐ हृषीकेशाय नमः . ॐ पद्मनाभाय नमः .
ॐ दामोदराय नमः . ॐ सङ्कर्षणाय नमः .
ॐ वासुदेवाय नमः . ॐ प्रद्युम्नाय नमः .
ॐ अनिरुद्धाय नमः . ॐ पुरुषोत्तमाय नमः .
ॐ अधोक्षजाय नमः . ॐ नारसिंहाय नमः .
ॐ अच्युताय नमः . ॐ जनार्दनाय नमः .
ॐ उपेंद्राय नमः . ॐ हरये नमः .
श्री कृष्णाय नमः ॥

---

३ प्राणायामः

(Due to pranayam, the rajas component decreases and the sattva component increases.)

ॐ प्रणवस्य परब्रह्म ऋषिः . परमात्मा देवता .
दैवी गायत्री छन्दः . प्राणायामे विनियोगः ॥

ॐ भूः . ॐ भुवः . ॐ स्वः . ॐ महः .
ॐ जनः . ॐ तपः . ॐ सत्यं .
ॐ भूर्भुवः स्वः ।
ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमही
धियो यो नः प्रचोदयात् ॥

पुनराचमन

(Repeat Achamana 2 - given above)

ॐ आपोज्योति रसोमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥

(Apply water to eyes and understand that you are of the nature of Brahman)

---

४ सङ्कल्पः

(Holding unbroken consecrated rice (akshata) and an offering spoon (pali) with water in the cup of one’s hand one should chant the mantra with the resolve, ‘I of the .....lineage (gotra), ... am performing the .... ritual to obtain the benefit according to the Shrutis, Smrutis and Puranas in order to acquire .... result and then should offer the water from the hand into the circular, shelving metal dish (tamhan). Offering the water into the circular, shelving dish signifies the completion of an act.)

सर्व देवता प्रार्थना

(Stand and hold a fruit in hand during sankalpa)

ॐ श्रीमान् महागणाधिपतये नमः .

श्री गुरुभ्यो नमः . श्री सरस्वत्यै नमः .

श्री वेदाय नमः . श्री वेदपुरुषाय नमः .

इष्टदेवताभ्यो नमः |

(Prostrations to your favorite deity)

कुलदेवताभ्यो नमः |

(Prostrations to your family deity)

स्थान देवताभ्यो नमः |

(Prostrations to the deity of this house)

ग्रामदेवताभ्यो नमः |

(Prostrations to the deity of this place)

वास्तुदेवताभ्यो नमः |

(Prostrations to the deity of all the materials we have collected)

शचीपुरंदराभ्यां नमः |

(Prostrations to the Indra and shachii)

उमामहेश्वराभ्यां नमः |

(Prostrations to Shiva and pArvati)

लक्ष्मीनारायणाभ्यां नमः |

(Prostrations to the Lords who protect us - LakShmi and NArAyaNa)

मातापितृभ्यां नमः |

(Prostrations to our parents)

सर्वेभ्यो देवेभ्यो नमो नमः |

(Prostrations to all the Gods)

सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः |

(Prostrations to all Brahamanas - those who are in the religious path)

एतद्कर्म प्रधान देवताभ्यो नमो नमः |

(Prostrations to Lord Anantapadmanabha Swamy, the main deity of this puja)

|| अविघ्नमस्तु ||

सुमुखश्च एकदंतश्च कपिलो गजकर्णकः .

लंबोदरश्च विकटो विघ्ननाशो गणाधिपः ||

धूम्रकेतुर्गणाध्यक्षो बालचन्द्रो गजाननः .

द्वादशैतानि नामानि यः पठेत् श्रुणुयादपि ||

विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा .

संग्रामे संकटेचैव विघ्नः तस्य न जायते ||

(Whoever chants or hears these 12 names of Lord Ganesha will not have any obstacles in any of their endeavours)

शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् |

प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशांतये ||

सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थ साधिके |

शरण्ये त्र्यंबके देवी नारायणी नमोऽस्तुते ||

(We completely surrender ourselves to that Goddess who embodies auspiciousness, who is full of auspicious-ness and who brings auspicousness to us)

सर्वदा सर्व कार्येषु नास्ति तेषां अमङ्गलम् |

येषां हृदिस्थो भगवान् मङ्गलायतनो हरिः ||

(When Lord Hari, who brings auspiciousness is situated in our hearts, then there will be no more inauspiciousness in any of our undertakings)

तदेव लग्नं सुदिनं तदेव ताराबलं चंद्रबलं तदेव .

विद्याबलं दैवबलं तदेव लक्ष्मीपतेः तेंघ्रिऽयुगं स्मरामि ||

(What is the best time to worship the Lord? When our hearts are at the feet of Lord Narayana, then the strength of the stars, the moon, the strength of knowledge and all the Gods will combine and make it the most auspicious time and day to worship the Lord)

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः .

येषां इन्दिवरश्यामो हृदयस्थो जनार्दनः ||

(When the Lord is situated in a person's heart, he will always have profit in his work and victory in all that he takes up and there is no question of defeat for such a person)

विनायकं गुरुं भानुं ब्रह्माविष्णुमहेश्वरान् |
सरस्वतीं प्रणम्यादौ सर्व कार्यार्थ सिद्धये ||

(To achieve success in our work and to find fulfillment we should first offer our prayers to Lord Vinayaka and then to our teacher, then to the Sun God and to the holy trinity of Brahma, ViShNu and Shiva)

श्रीमद् भगवतो महापुरुषस्य विष्णोराज्ञया
प्रवर्तमानस्य अद्य ब्रह्मणो द्वितीय परार्धे विष्णुपदे
श्री श्वेतवराह कल्पे वैवस्वत मन्वन्तरे ---------------
देशे, शालिवाहन शके वर्तमाने व्यवहारिके ------------
नाम संवत्सरे दक्षिणायणे वर्षा ऋतौ भाद्रपद मासे
शुक्ल पक्षे चतुर्दश्याम् तिथौ ----- नक्षत्रे ----- वासरे
सर्व ग्रहेषु यथा राशि स्थान स्थितेषु सत्सु एवं
गुणविशेषेण विशिष्टायां शुभपुण्यतिथौ मम आत्मन
श्रुतिस्मृति पुराणोक्त फलप्राप्यर्थं मम सकुटुम्बस्य
क्षेम स्थैर्य आयुरारोग्य चतुर्विध पुरुषार्थ सिध्यर्थं
अंगीकृत श्री अनन्तपद्मनाभ व्रतांगत्वेन संपादित
सामग्रव्या गणेश वरुण ब्रह्मा सूर्यादि नवग्रह इंद्रादि
अष्टलोकपाल गणपति चतुष्ट देवता पूजनपूर्वकं श्री
अनन्तपद्मनाभ प्रीत्यर्थं यथा शक्त्या यथा मिलिता
उपचार द्रव्यैः पुरुषसूक्त, श्री सूक्त पुराणोक्त
मन्त्रैश्च ध्यान आवाहनादि षोडशोपचारे श्री
अनन्तपद्मनाभ पूजनं तथा व्रतोक्त कथा श्रवणं च
करिष्ये ||

इदं फलं मया देव स्थापितं पुरतस्तव |
तेन मे सुफलावाप्तिर् भवेत् जन्मनि जन्मनि ||
(keep fruits in front of the Lord)

---

५. षडङ्ग न्यास
(Purifying the body)

५.(१) षडङ्ग न्यास
(Purifying hands and various parts of the body)

ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू कावूरू पादावुच्येते ।।
ॐ ह्रां | अंगुष्ठाभ्यायां नमः | हृदयाय नमः ||
(touch the thumbs)

ॐ ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः ।
उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ।।
ॐ ह्रीं | तर्जनीभ्यां नमः | शिरसे स्वाहः ||
(touch both fore fingers)

ॐ चन्द्रमा मनसो जातः चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ।।
ॐ ह्रूं | मध्यमाभ्यां नमः | शिखायै वषट् ||
(touch middle fingers)

ॐ नाभ्या आसीदन्तरिक्षम् शीर्ष्णो द्यौः समवर्तत ।
पदभ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयन्।।

ॐ ह्रैं | अनामिकाभ्यां नमः | कवचाय हुम् ||
(touch ring fingers)

ॐ धाता पुरस्ताद्यमुदाजहार
शक्रः प्रविद्वान्प्रदिशश्चतस्रः ।
तमेवं विद्यानमृत इह भवति
नान्यः पन्था अयनाय विद्यते ।।
ॐ ह्रौं | कनिष्ठिकाभ्यां नमः | नेत्रत्रयाय वौषट् ||
(touch little fingers)

यज्ञेन यज्ञमयजन्त देवाः

तानि धर्माणि प्रथमान्यासन् ।

ते ह नाकं महिमानः सचन्ते

यत्र पूर्वे साध्याः सन्ति देवाः ।।

ॐ ह्रः | करतलकरपृष्ठाभ्यां नमः | अस्त्राय फट् ||

(touch palms and over sleeve of hands)

५.(२) दिग्बन्धन

(show mudras)

ॐ अनन्तपद्मनाभ इति दिग्बन्धः |

(snap fingers, circle head clockwise and clap hands)

दिशो बद्नामि ||

(shut off all directions i.e. distractions so that we can concentrate on the Lord)

---

६ गणपति पूजा

(To prevent any obstacle from disrupting an auspicious occasion, it is begun with the worship of Lord Ganapati.)

आदौ निर्विघ्नता सिध्यर्थं महा गणपति पूजनं करिष्ये .

ॐ गणानां त्वा शौनको गृत्समदो गणपतिर्जगती गणपत्यावाहने विनियोगः ||

(pour water)

ॐ गणानां त्वा गणपतिं हवामहे

कविं कवीनामुपम श्रवस्तमं |

ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत

आ नः शृण्वन्नूतिभिः सीदसादनं ||

भूः गणपतिं आवाहयामि .

भुवः गणपतिं आवाहयामि .

स्वः गणपतिं आवाहयामि .

ॐ भूर्भुवस्वः सांगं सपरिवारं सायुधं सशक्तिकं महागणपतिं आवाहयामि |

(O great Ganapati come along with Riddhi, Buddhi, your entire family, all your weapons and might')

ॐ भूर्भुवस्वः महागणपतये नमः ध्यायामि. ध्यानम् समर्पयामि |

ॐ महागणपतये नमः. आवाहनं समर्पयामि |

ॐ महागणपतये नमः. आसनं समर्पयामि |

ॐ महागणपतये नमः. पाद्यं समर्पयामि |

ॐ महागणपतये नमः. अर्घ्यं समर्पयामि |

ॐ महागणपतये नमः. आचमनीयं समर्पयामि |

ॐ महागणपतये नमः. स्नानं समर्पयामि |

ॐ महागणपतये नमः. वस्त्रं समर्पयामि |

ॐ महागणपतये नमः. यज्ञोपवीतं समर्पयामि |

ॐ महागणपतये नमः. चंदनं समर्पयामि |

ॐ महागणपतये नमः. परिमल द्रव्यं समर्पयामि |

ॐ महागणपतये नमः. पुष्पाणि समर्पयामि |

ॐ महागणपतये नमः. धूपं समर्पयामि |

ॐ महागणपतये नमः. दीपं समर्पयामि |

ॐ महागणपतये नमः. नैवेद्यं समर्पयामि |

ॐ महागणपतये नमः. ताम्बूलं समर्पयामि |

ॐ महागणपतये नमः. फलं समर्पयामि |

ॐ महागणपतये नमः. दक्षिणां समर्पयामि |

ॐ महागणपतये नमः. आर्तिक्यं समर्पयामि |

ॐ भूर्भुवस्वः महागणपतये नमः.

मन्त्रपुष्पं समर्पयामि |

ॐ भूर्भुवस्वः महागणपतये नमः |

प्रदक्षिणा नमस्कारान् समर्पयामि |

ॐ भूर्भुवस्वः महागणपतये नमः. छत्रं समर्पयामि |

ॐ महागणपतये नमः. चामरं समर्पयामि |

ॐ महागणपतये नमः. गीतं समर्पयामि |

ॐ महागणपतये नमः. नृत्यं समर्पयामि |

ॐ महागणपतये नमः. वाद्यं समर्पयामि |

ॐ महागणपतये नमः. सर्व राजोपचारान्
समर्पयामि||

|| अथ प्रार्थना ||

ॐ वक्रतुण्ड महाकाय कोटिसूर्य समप्रभ.
निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा ||

ॐ भूर्भुवस्वः महागणपतये नमः. प्रार्थनां समर्पयामि|

अनया पूजया विघ्नहर्ता महागणपतिः प्रीयताम् ||

(Offering of flowers - May Shri Mahaganapati, the vanquisher of all obstacles be appeased with this worship of mine', chanting thus water should be released.)

---

७ दीप स्थापना

अथ देवस्य वाम भागे दीप स्थापनं करिष्ये |

अग्निर्नाग्निः समिध्यते कविर्ग्रहपतिर्युवा हव्यवात्
जुवास्यः ||

(light the lamps)

---

८ भूमि प्रार्थना

(open palms and touch the ground.
first the earth (ground) on the right hand side (since the host performing the religious ceremony is facing the east, the hand touching the ground is in the southern direction) and then the earth on the left hand side, in front of oneself (that is the northern direction) should be touched. Energies from the south are distressing. To prevent them from causing distress, one offers obeisance to them by touching the earth. The energies from the north are however saluted as they are pleasant.)

महीध्यौः पृथिवीचन इमं यज्ञं मिमिक्षतां
पिप्रतान्नो भरीमभिः ||

---

९ धान्य राशि

ॐ औषधाय संवदंते सोमेन सहराज्ञ .
यस्मै कृणेति ब्राह्मणस्थं राजन् पारयामसि ||

(Touch the grains/rice/wheat)

---

१० कलश स्थापना

(Two small heaps of rice should be made on the ground amidst chanting mantras. Later, chanting the mantra two pots of either gold, silver, copper or unbroken earthen pots should be placed on these two heaps.)

ॐ आ कलशेषु धावति पवित्रे परिसिंच्यते
उक्तैर्यज्ञेषु वर्धते ||

(keep kalasha on top of rice pile)

ॐ इमं मे गङ्गे यमुने सरस्वती शुतुद्रि स्तोमं
सचता परुष्ण्या .
असिक्न्य मरुद्वृधे वितस्तयार्जीकीये श्रुणुह्या
सुषोमया ||

(fill kalasha with water)

ॐ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं .
ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रियं ||

(sprinkle in/apply ga.ndha to kalasha)

ॐ या फलिनीर्या अफला अपुष्पायाश्च पुष्पिणीः .
बृहस्पति प्रसोतास्थानो मंचत्वं ह सः ||

(put betel nut in kalasha)

ॐ सहिरत्नानि दाशुषुसुवाति सविता भगः .
तम्भागं चित्रमीमहे ||

(put jewels / washed coin in kalasha)

ॐ हिरण्यरूपः हिरण्य सन्द्रिग्पान्न पात्स्येदु हिरण्य

वर्णः .

हिरण्ययात् परियोनेर्निषद्या हिरण्यदा ददत्थ्यन्

नमस्मै ||

(put gold / daxina in kalasha)

ॐ काण्डात् काण्डात् प्रोहंती परुषः परुषः परि

एवानो दूर्वे प्रतनु सहस्रेण शतेन च ||

(put duurva / karika)

ॐ अश्वत्थेवो निशदनं पर्णिवो वसतिश्कृत .

गो भाज इत्किला सथयत्स नवथ पूरुषं ||

(put five leaves in kalasha)

ॐ या फलिनीर्या अफला अपुष्पायाश्च पुष्पिणीः .

बृहस्पति प्रसोतास्थानो मंचत्वं ह सः ||

(place coconut on kalasha)

ॐ युवासुवासः परीवीतागात् स उश्रेयान् भवति

जायमानः .

तं धीरासः कावयः उन्नयंति स्वाद्ध्यो स्वाद्ध्यो

मनसा देवयंतः||

(tie cloth for kalasha)

ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत .

वस्ने व विक्रीणावः इषमूर्जं शतक्रतो ||

(decorate copper plate and ashhTadala with kuMkuM)

इति कलशं प्रतिष्ठापयामि ||

सकल पूजार्थे अक्षतान् समर्पयामि ||

---

११. १ यमुना पूजन

(On the second kalasha)

११. १ यमुना ध्यानं

क्षीरोदार्णव संभूते इन्द्रनील समप्रभे |

सुप्रसन्ने महादेवि विष्णुमूर्ते नमोस्तुते ||

श्री यमुना देवतायै नमः| ध्यानम् समर्पयामि ||

---

११. २ यमुना आवाहनं

यमुने ते नमस्तुभ्यं सर्व कामप्रदायिनि |

सर्व सौभाग्यदे देवि यमुने ते नमोस्तुते ||

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।

चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ||

श्री यमुना देवतायै नमः| आवाहनं समर्पयामि ||

---

११. ३ यमुना आसनं

वेदपादे नमस्तुभ्यं सर्वलोक हितेरते |

सर्व शाप प्रशमने तुङ्गभद्रे नमोस्तुते ||

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।

यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ||

श्री यमुना देवतायै नमः| आसनं समर्पयामि ||

---

११. ५ यमुना अर्घ्यं

कृष्णवेण्यै नमस्तुभ्यं कृष्ण वर्णे सुलोचने |

कृष्णमूर्ते नमस्तुभ्यं देवि कृष्णे नमोस्तुते ||

कांसोस्मि तां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां

तर्पयन्तीम् ।

पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ||

श्री यमुना देवतायै नमः | अर्घ्यं समर्पयामि ||

---

११. ६ यमुना आचमनं

सत्कर्म निरते देवी ज्ञान मूर्त्ति प्रकाशिनि |
आत्मज्योति महामूर्त्ति सर्वनुष्ठान कारिणि ||

चन्द्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ||

श्री यमुना देवतायै नमः| आचमनीयं समर्पयामि ||

---

११. ७ यमुना मधुपर्कं

सर्वागम नमस्कार्ये प्रधानोचित देवते |
इदम् ग्रहाण देवेशि मधुपर्कं ददामिते ||

श्री यमुना देवतायै नमः| मधुपर्कं समर्पयामि ||

---

११. ८ यमुना पञ्चामृत स्नानं

नन्दि पादे नमस्तुभ्यं शङ्करार्ध शरीरिणि |
सर्वलोकनुते देवि भीम रत्यै नमोस्तुते ||

श्री यमुना देवतायै नमः| पञ्चामृत स्नानं समर्पयामि||
श्री यमुना देवतायै नमः| गन्धोदक स्नानं समर्पयामि||
श्री यमुना देवतायै नमः| शुद्धोदक स्नानं समर्पयामि||

ॐ आपोहिष्टा मयो भुवः । ता न ऊर्जे दधातन ।
महेरणाय चक्षसे । यो वः शिवतमो रसः तस्यभाजयते ह नः ।
उशतीरिव मातरः । तस्मा अरंगमामवो । यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ||

---

११. ९ यमुना वस्त्रं

सिंहपादे नमस्तुभ्यं नारसिम्ह्यै नमोस्तुते |
सर्वलक्षण संयुक्ते यमुने ते नमोस्तुते ||

उपैतु मां देवसखः कीर्तिश्च मणिना सह |
प्रादुर्भूतोऽस्मि राष्ट्रेस्मिन्कीर्तिमृद्धिं ददातु मे ||

श्री यमुना देवतायै नमः | वस्त्रं समर्पयामि||

---

११. १० यमुना कञ्चुकीं

कृष्ण पादाब्ज सम्भूते गंगे त्रिपथगामिनि |
जटा जूट समद्भूते भागीरथ्यै नमोस्तुते ||

श्री यमुना देवतायै नमः| कञ्चुकीं समर्पयामि||

---

११. ११ यमुना आभरणं

गोदावरि नमस्तुभ्यं सर्वाभीष्ट प्रदायिनि |
सर्वालङ्कार संयुक्ते गोदावर्यै नमोस्तुते ||

श्री यमुना देवतायै नमः| सर्वाभरणानि समर्पयामि||

----

११. १२ यमुना उपवीतं

काञ्चनं ब्रह्मसूत्रं च ब्रह्मणा निर्मितं पुरा |
अहम् दास्यामि देवेशि यमुने ते नमोस्तुते ||

श्री यमुना देवतायै नमः| उपवीतं समर्पयामि||

----

११. १३ यमुना चन्दनं

चन्दनागरु कस्तूरि रोचनम् कुंकुमं तथा |
कर्पूरेण समायुक्तं गन्धं ददामि च भक्तितः ||

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् |
ईश्वरीं सर्वभूतानां तामिहोपहवये श्रियम् ||
श्री यमुना देवतायै नमः| गन्धं समर्पयामि||

----

११. १४ यमुना अक्षतान्

श्वेतांश्च चन्द्र वर्णाभान् हरिद्रा रागरञ्जितान् |
अक्षतान्श्च सुरश्रेष्ठे ददामि यमुनेश्वरी ||

श्री यमुना देवतायै नमः| अलङ्कारार्ते अक्षतान् समर्पयामि||

----

११. १५ यमुना कुंकुमं

कुंकुमं कामदं दिव्यं स्त्रीणां बालस्य भूषणम् |
सौभाग्यार्थे प्रयच्छामि देवित्वं प्रतिग्रह्यताम् ||

श्री यमुना देवतायै नमः| कुंकुमं समर्पयामि||

----

११. १६ यमुना पुष्पं

मन्दार पारिजाताद्यै केतकी पतलादिभिः |
मल्लिका पुष्प सम्घातेर् अर्चये त्व शुभप्रदे ||

मनसः काममाकूतिं वाचः सत्यमशीमहि |
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ||

श्री यमुना देवतायै नमः| पुष्पपूजां समर्पयामि||

----

११. १७ अथाङ्ग पूजा

चञ्चलायै नमः | पादौ पूजयामि||
चपलायै नमः | जानुनी पूजयामि||
कमलवासिन्यै नमः | जंघै पूजयामि||
मन्मथवासिन्यै नमः | ऊरून् पूजयामि||
कमलनेत्रे नमः | कटिं पूजयामि||

दुष्टहन्त्र्यै नमः | नाभिं पूजयामि
ललितायै नमः | भुजौ पूजयामि||
रक्तवर्णायै नमः | कण्ठं पूजयामि||
गङ्गायै नमः | मुखं पूजयामि||
कृष्णवेण्यै नमः | ललाटं पूजयामि||

गौर्यै नमः | नेत्रे पूजयामि||
भागीरत्यै नमः | शिरः पूजयामि||
यमुनायै नमः | सर्वाङ्गानि पूजयामि||

---

११. १८ यमुना पत्रपूजा

यमुनायै नमः | जाजी पत्रं समर्पयामि||
गङ्गायै नमः| शत पत्रं समर्पयामि||
लोकवन्दितायै नमः| चूत पत्रं स्मर्पयामि||
लोकपावनायै नमः| शामी पत्रं समर्पयामि||
कमलवासिन्यै नमः| दत्तूर पत्रं समर्पयामि||

महामायायै नमः| पारिजात पत्रं समर्पयामि||
गोदावर्यै नमः| वेणु पत्रं समर्पयामि||
उत्कण्टिन्यै नमः| मरुग पत्रं समर्पयामि||
भवहर्त्र्यै नमः | देवदारु पत्रं समर्पयामि||
अघनाशिन्यै नमः | अपामार्ग पत्रं समर्पयामि||

कान्त्यै नमः | धाती पत्रं समर्पयामि||
विन्दयवासिन्यै नमः | अगस्त्य पत्रं समर्पयामि||
भागीरत्यै नमः | तुलसी पत्रं समर्पयामि||
सुरासुरपूजितायै नमः | समस्त पत्राणि समर्पयामि||

---

११. १९ अथः पुष्प पूजा

भागीरत्यै नमः | कमल पुष्पं समर्पयामि||
विन्दयवासिन्यै नमः | नीलोत्पल पुष्पं समर्पयामि||
कौमार्यै नमः | नन्दावर्त पुष्पं समर्पयामि||
काळ्यै नमः | मन्दार पुष्पं समर्पयामि||
कान्त्यै नमः | सुरन्गि पुष्पं समर्पयामि||
अघनाशिन्यै नमः | पारिजात पुष्पं समर्पयामि||
भवहन्त्र्यै नमः | सुगन्धि पुष्पं समर्पयामि||
गौर्यै नमः | केतकी पुष्पं समर्पयामि||
उत्कण्टिन्यै नमः | जाजी पुष्पं समर्पयामि||
महामायायै नमः | शत पुष्पं समर्पयामि||

तेजसे नमः | मल्लिका पुष्पं समर्पयामि||
मन्मथवासिन्यै नमः | चम्पका पुष्पं समर्पयामि||
लोकपावनायै नमः | अशोक पुष्पं समर्पयामि||
लोकवन्दितायै नमः | अगस्त्य पुष्पं समर्पयामि||
गङ्गायै नमः | पूग पुष्पं समर्पयामि||

यमुनायै नमः | समस्त पुष्पाणि समर्पयामि||

---

११. २० अथः नामपूजा

सर्व पाप हरे देवी सर्वोपद्रव नाशिनि |
सर्वव्रितसखे देवि यमुने ते नमोस्तुते ||

शीताकर्शिण्यै नमः ||
शुभ्रवर्णायै नमः ||
कनकायै नमः ||
कण्ठोत्पलायै नमः ||
त्रिगुणात्मिकायै नमः ||

ब्रह्मरूपायै नमः ||
महारूपायै नमः ||
गौर्यै नमः ||

अभीष्टदात्र्यै नमः ||
धात्र्यै नमः ||
हरिप्रियायै नमः ||
सिन्धुचूडायै नमः ||
शिवायै नमः ||
शङ्करार्धशरीरिण्यै नमः ||
सरस्वत्यै नमः ||

गायत्रियै नमः ||
गोदावर्यै नमः ||
गोमत्यै नमः ||
गरुडायै नमः ||
गिरिजायै नमः ||

चन्द्रचूडायै नमः ||
कावेर्यै नमः ||
गङ्गायै नमः ||
तुङ्गायै नमः ||
नर्मदायै नमः ||

कृष्णवेण्यै नमः ||
भीमरत्यै नमः ||
श्री यमुनायै नमः ||

----

११. २१ यमुना धूपः

दशाङ्गम् गुग्गुलम् धूपं चन्दनागरु संयुतम् |
येतेशेव्योत्तमं धूपं यमुने ते नमोस्तुते ||
कर्दमेन प्रजाभूतामयि सम्भवकर्दम |
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ||
श्री यमुना देवतायै नमः| धूपं समर्पयामि ||

----

११. २२ यमुना दीपं

घृतवर्ति समायुक्तं भवान्यै च निवेदितम् |
ग्रहाण मङ्गलं दीपं सर्वेश्वर्य प्रदायिनि ||
आपः सृजन्तु स्निग्धानि चिक्लीतवसमे गृहे |
निचदेवीं मातरं श्रियं वासय मे कुले ||
श्री यमुना देवतायै नमः| दीपं समर्पयामि ||

----

११. २३ यमुना नैवेद्यं

कदळी नारिकेळेश्च चणकादि समन्वितम् |
ग्रहाण मङ्गलं दीपं सर्वेश्वर्य प्रदायिनि ||
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् |
अभूतिमसमृद्धिं च सर्वां निर्णुदमे गृहात् ||
श्री यमुना देवतायै नमः| नैवेद्यं समर्पयामि ||
प्राणाय स्वाहा
अपानाय स्वाहा
व्यानाय स्वाहा
उदानाय स्वाहा
समानाय स्वाहा

श्री यमुना देवतायै नमः| उत्तरापोषणं समर्पयामि ||

----

११. २४ यमुना पानीयं

पानीयं पावनं श्रेष्टं गङ्गादि सलिलोद्भवम् |
मुखं प्रक्षालनं देवि ग्रहाणत्वां नमोस्तुते ||
श्री गङ्गायै नमः| मुखप्रक्षालनं समर्पयामि ||

---

११. २५ यमुना करोद्वर्तनकं

कर्पूरेण समायुक्तं नागवल्लिदलैर्युतम् |
चूर्ण कर्पूर संयुक्तं ताम्बूलं प्रतिगृह्यताम् ||

आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् |
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ||
श्री गङ्गायै नमः| करोद्वर्तनार्थे चन्दनं समर्पयामि ||

---

११. २६ यमुना ताम्बूलं

पूगिफलम् समायुक्तं नागवल्लि दलैर्युतम् |
चूर्णकर्पूर संयुक्तं ताम्बूलं प्रतिगृह्यताम् ||

श्री यमुना देवतायै नमः | ताम्बूलं समर्पयामि ||

---

११. २७ यमुना फल समर्पणं

इदं फलं मया देवि स्थापितं पुरतस्तव |
तेन मे सुफलावाप्तिर् भवेत् जन्मनि जन्मनि ||

श्री यमुना देवतायै नमः | फलम् समर्पयामि ||

---

११. २८ यमुना दक्षिणा

हिरण्य गर्भ गर्भस्थ हेमबीज विभावसोः |
अनन्त पुण्य फलदा अथः शान्तिं प्रयच्छ मे ||

श्री यमुना देवतायै नमः | दक्षिणां समर्पयामि ||

---

११. २९ यमुना नीराजनं

मङ्गलं च महादेवि मङ्गलं च शुभप्रदे |
मङ्गलं सर्व पापघ्ने मङ्गलं मङ्गलप्रदं ||
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् |
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ||

श्री यमुना देवतायै नमः | नीराजनं समर्पयामि ||

---

११. ३० यमुना पुष्पांजलि

सरसिजनिलये सरोजहस्ते धवलतरां
शुकगन्धमाल्यशोभे |
भगवति हरिवल्लभे मनोज्ञे त्रिभुवन भूतिकरि प्रसीद
महयम् ||

श्री यमुना देवतायै नमः | पुष्पांजलिं समर्पयामि ||

---

११. ३१ यमुना प्रदक्षिणा

प्रदक्षिण त्रयं देवि प्रयत्नेन मयाक्रतं |
अनन्त सागरात् पूर्वं सर्व सौभाग्यदायिनि ||

श्री यमुना देवतायै नमः | प्रदक्षिणां समर्पयामि ||

---

११. ३२ यमुना नमस्कारः

करिष्यामि व्रतं देवि त्वद् भक्त्यात् त्वत् प्रसादतः |
विघ्नानि प्रशमं याव्रताद्यन्तु त्वदाग्नया ||
श्री यमुना देवतायै नमः | नमस्करान् समर्पयामि ||

यस्य स्मृत्या च नाम्नोक्त्या तपः पूजा क्रियादिषु |
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तं अच्युतम् ||

मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन |
यत्पूजितं मयादेवि परिपूर्णम् तदस्तुमे |

अनेन यमुनापुजनेन यमुनान्तर्गत |
श्रीमद् अनन्तः प्रीयताम् प्रीतो भवतु ||

---

११. २ अथः शेष पूजनं

ब्रह्माण्ड आदार भूतम् च यमुनान्तर वसिनं |
फणा सप्त समायुक्तम् ध्यायेऽनन्तं हरिप्रियम् ||

श्री शेषाय नमः ध्यायामि ||

---

११. २. १ शेष आवाहनं

शेषम् सप्त फणायुक्तम् काल पन्नग नायकम् |
अनन्त शयनार्तं त्वां भक्त्याह्यावाहयांयहम् ||

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम् ||

---

११. २. २ शेष आसनं

नवनाग कुलाधीश शेशोधारक काश्यप |
नानारत्न समायुक्तं आसनं प्रतिगृह्यतां ||
पुरुष एवेदगं सर्वम् यद्भूतं यच्छ भव्यम् ।
उतामृतत्वस्येशानः यदन्नेनातिरोहति ||

श्री शेषाय नमः | आसनं समर्पयामि ||

---

११. २.३ शेष पाद्यं

अनन्त प्रिय शेशेष जगदाधार विग्रह |
पाद्यम् ग्रहाण भक्त्या त्वम् काद्रवेय नमोस्तुते ||
एतावानस्य महिमा अतो ज्यायागंश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ||

श्री शेषाय नमः | पाद्यं समर्पयामि ||

---

११. २.४ शेष अर्घ्यं

कश्यपानन्द जनक मुनिवन्दित भो प्रभो |
अर्घ्यं ग्रहाण सर्वग्न सागरं शंकरप्रिये ||
त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवात्पुनः ।
ततो विश्वङ्व्यक्रामत् साशनानशने अभि ||

श्री शेषाय नमः | अर्घ्यं समर्पयामि ||

---

११. २.५ शेष आचमनं

सहस्र फणिरूपेण वसुधोधारक प्रभो |

ग्रहाणाचमनं देव पावनं च सुशीतलं ||
तस्माद्विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ||
श्री शेषाय नमः | आचमनं समर्पयामि ||

---

११. २.६ शेष मधुपर्क

कुमाररूपिणे तुभ्यं दधिमध्वज्य सम्युतं |
मधुपर्कं प्रदास्यामि सर्पराज नमोस्तुते ||
यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यम् ग्रीष्म इध्मश्शरद्धविः ||

श्री शेषाय नमः | मधुपर्कं समर्पयामि ||

---

११. २.७ शेष पंचामृत स्नानं

श्री शेषाय नमः | पयः स्नानं समर्पयामि ||
श्री शेषाय नमः | दधि स्नानं समर्पयामि ||
श्री शेषाय नमः | घृत स्नानं समर्पयामि ||
श्री शेषाय नमः | मधु स्नानं समर्पयामि ||
श्री शेषाय नमः | शर्करा स्नानं समर्पयामि ||
श्री शेषाय नमः | पंचामृत स्नानं समर्पयामि ||

---

११. २.८ शेष स्नानं
(chant purusha sukta shlokas in the pages below)

गङ्गादि पुण्य तीर्थै त्वाम् अभ्शिन्चेयमादरात् |
बलबद्रावतारेश नन्दनः श्रीपतेः सखिन् ||
सप्तास्यासन् परिधयः त्रिस्सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वानाः अबध्नन्पुरुषं पशुम् ||

श्री शेषाय नमः | शुद्धोदक स्नानम् समर्पयामि ||

---

११. २.९ शेष वस्त्रं
कौशेय युग्मम् देवेश प्रीत्य तव मयार्पितम् |
पन्नगाधिश नागेश ताक्ष्र्यशत्रो नमोस्तुते ||
तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ||

श्री शेषाय नमः | वस्त्रं समर्पयामि ||

---

११. २. १० शेष यज्ञोपवीतं

सुवर्ण निर्मितं सूत्रं ग्रन्थितं कण्टहारकम् |
अनेकरत्नयेखचितं सर्पराज नमोस्तुते ||
तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे ।
छन्दाँसि जज्ञिरे तस्मात् यजुस्तस्मादजायत ||

श्री शेषाय नमः | यज्ञोपवीतं समर्पयामि ||

---

११. २. ११ शेष आभरणं

अनेक रत्नान्वित हेमकुन्डले माणिक्य सम्काशित कन्कणद्वयम् |
हैमान्गुलीयं कृत रत्न मुद्रिकं हैमं किरीटं फणिराजितेर्पितं ||

श्री शेषाय नमः | सर्वाभरणानि समर्पयामि ||

---

११. २. १२ शेष गन्धं

श्रीकन्डं चन्दनं दिव्यं गन्धाड्यम् सुमनोहरं |
विलेपनं सुरश्रेश्ट चन्दनं प्रतिगृह्यताम् ||
तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ।
पशूँस्तागंश्चक्रे वायव्यान् आरण्यान् ग्राम्याश्चये ||
श्री शेषाय नमः | गन्धं समर्पयामि ||

----

११. २. १३ शेष अक्षताः

अक्षताश्च सुरश्रेश्ट कुङ्कुमाक्तः सुशोभिताः |
मया निवेदिता भक्त्या ग्रहाण परमेश्वर ||

श्री शेषाय नमः | अक्षतान् समर्पयामि ||

----

११. २. १४ शेष पुष्पमाला

करवीर्य जाजि कुसुमैस्चम्पकै बकुले शुबै |
शतपत्रैश्च कल्हारै अर्चयेत् परमेश्वर ||
तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ||

श्री शेषाय नमः | पुष्पाणि समर्पयामि ||

----

११. २. १५ अथः शेष अङ्ग पूजा

सहस्रपादाय नमः | पादौ पूजयामि ||
गूड्गुल्फाय नमः | गुल्फौ पूजयामि ||
हेमजङ्घाय नमः | जंघै पूजयामि ||
मन्द गतये नमः | जानुनी पूजयामि ||
पीताम्बरधराय नमः | कटिं पूजयामि ||
गम्भीरनाभाय नमः | नाभिं पूजयामि ||
पवनाशाय नमः | उदरं पूजयामि ||
उरगाय नमः | हस्तौ पूजयामि ||
कालीयाय नमः | भुजौ पूजयामि ||
कम्बुकण्टाय नमः | कण्टं पूजयामि ||

विशवक्त्राय नमः | वक्त्रं पूजयामि ||
फणाभूषणाय नमः | ललाटं पूजयामि ||
लक्ष्मणाय नमः | शिरः पूजयामि ||
अनन्त प्रियाय नमः | सर्वाङ्गानि पूजयामि ||

----

११. २. १६ शेष धूपं

वनस्पति रसोद्भूतो गन्दाड्यो गन्ध उत्तमः |
आघ्रेय सर्व देवानाम् धूपोयम् प्रतिगृयताम् ||
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू कावूरू पादावुच्येते ||

श्री शेषाय नमः | धूपं समर्पयामि ||

----

११. २. १७ शेष दीपं

साज्यं त्रिवर्ति सम्युक्तं वह्निना योजितुम् मया |
दीपं गृहाण देवेश त्रैलोक्य तिमिरापहम् ||
भक्त्या दीपं प्रयश्चामि देवाय परमात्मने |
त्राहि मां नरकात् घोरात् दीपं ज्योतिर् नमोस्तुते ||

ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः ।

उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ||

श्री शेषाय नमः । दीपं समर्पयामि ||

---

११. २. १८ शेष नैवेद्यं

नैवेद्यं गृह्यतां देव भक्ति मे अचलां कुरुः |
ईप्सितं मे वरं देहि इहत्र च परां गतिम् ||
शर्कराख़न्डख़ाद्यानि दधिक्षीरगृतानि च |
आहारं भ्क्ष्य भोज्यं च नैवेद्यं प्रतिगृह्यताम् ||

चन्द्रमा मनसो जातः चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ||

श्री शेषाय नमः | नैवेद्यं समर्पयामि ||

नैवेद्यात् पूर्वे आचमनीयं समर्पयामि ||

प्राणाय स्वाहा
अपानाय स्वाहा
व्यानाय स्वाहा
उदानाय स्वाहा
समानाय स्वाहा

मध्ये पानीयं समर्पयामि |
उत्तरापोशनं समर्पयामि ||

श्री शेषाय नमः | हस्त प्रक्षाळनं समर्पयामि ||
श्री शेषाय नमः | मुखप्रक्षाळनं समर्पयामि ||

श्री शेषाय नमः करोद्वर्तनार्थे चंदनं समर्पयामि ||

पूगीफलं महाद्दिव्यं नागवल्लि दलैर्युतम् |
कर्पूरेळसमायुक्तं ताम्बूलं प्रतिगृह्यताम् ||

---

११. २. १९ शेष दक्षिणां

हिरण्य गर्भ गर्भस्थ हेमबीज विभावसोः |
अनन्त पुण्य फलदा अथः शान्तिं प्रयच्छ मे ||

ॐ श्री शेषाय नमः | सुवर्ण पुष्प दक्षिणां समर्पयामि||

---

११. २. २० महा फलं

(put tulsi / axathA on a big fruit)

इदं फलं मयादेव स्थापितं पुरतस्थव |
तेन मय् सफलावाप्तिर्भवेत् जन्मनि जन्मनि ||

ॐ श्री शेषाय नमः | महाफलं समर्पयामि ||

---

११. २. २१ महा नीराजन

ॐ श्रियै जातः श्रिय अनिरियाय श्रियं वयो जरितृभ्यो ददाति
श्रियं वसाना अमृतत्वमायन् भवंति सत्य स मिथामितद्रौ
श्रिय एवैनं तत् श्रियामादधाति संततमृचा वषट्कृत्यं
संतत्यै संधीयते प्रजया पशुभिः य एवं वेद ||
कर्पूर दीपं करुणावतारं संसार सारं भुजगेन्द्रहारम् |

सदावसन्तं हृदयारविन्दे भवं भवानी सहितं नमामि||

नाभ्या आसीदन्तरिक्षम् शीर्ष्णो द्यौः समवर्तत ।
पदभ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयन् ||
ॐ श्री शेषाय नमः | महानीराजन दीपं समर्पयामि||

---

११. २. २२ पुष्पांजली

नानाकुसुम संयुक्तं पुष्पांजलीमिमं प्रभो |
कश्यपानन्द जनक सर्पेश प्रतिगृह्यताम् ||

श्री शेषाय नमः | पुष्पांजलीं समर्पयामि ||

---

११. २. २३ प्रदक्षिणः नमस्कारः

यानि कानि च पापानि जन्मांतर कृतानि च |
तानि तानि विनश्यन्ति प्रदक्षिण पदे पदे ||
नमो (अ)स्तु अनंताय सहस्र मूर्तये सहस्र पादाक्षि
शिरोरु बाहवे ।
सहस्र नाम्ने पुरुषाय शाश्वते सहस्र कोटी युगधारिणे
नमः ||
सप्तास्यासन् परिधयः त्रिस्सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वानाः अबध्नन्पुरुषं पशुम् |

श्री शेषाय नमः | प्रदक्षिणः नमस्कारान् समर्पयामि||

---

११. २. २४ प्रार्थना

अनन्तकल्पोक्तफलं देहिमे त्वं महेश्वर |
त्वत्पूजारहितच्छार्धं फलं प्राप्नोति मानवः ||

श्री शेषाय नमः | प्रार्थनां समर्पयामि ||
अनेन कृत पूजनेन श्री शेषः प्रियताम् ||

श्रीमद् अनन्त पूजा

(keep a few red threads each with 14 knots smeared with kumkum on the altar)

---

१२ कलश पूजन

(continue with second kalasha)

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः |
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ||
कुक्षौतु सागराः सर्वे सप्त द्वीपा वसुंधराः |
ऋग्वेदोथ यजुर्वेदः सामवेदोह्यथर्वणः ||
अंगैश्च सहिताः सर्वे कलशंतु समाश्रिताः |
अत्र गायत्री सावित्री शांति पुष्टिकरी तथा ||

आयान्तु देव पूजार्थं अभिषेकार्थ सिद्धये ||

ॐ सितासिते सरिते यत्र संगथे तत्राप्लुतासो
दिवमुत्पतंति |
ये वैतन्वं विस्रजन्ति धीरास्ते जनासो अमृतत्त्वं
भजन्ति ||

(Those who want to attain immortality take a dip in the confluence of the Ganges, yamuna and sarasvati rivers at the prayag. Let the water in this kalasha become like the water from the holy rivers)

|| कलशः प्रार्थनाः ||

कलशः कीर्तिमायुष्यं प्रज्ञां मेधां श्रियं बलम् |
योग्यतां पापहानिं च पुण्यं वृद्धिं च साधयेत् ||

(Let this kalasha increase our life span, presence of mind, intellect,wealth, strength and status, destroy our sins and increase our merits or puNya)

सर्व तीर्थमयो यस्मात् सर्व देवमयो यतः ।

अतः हरिप्रियोऽसि त्वं पूर्णकुंभं नमोऽस्तुते ॥

(All the holy waters, and all the Gods are now present in this kalasha. Our prostrations to this puurNakumbha which is hence dear to Lord Hari)

कलशदेवताभ्यो नमः ।

सकल पूजार्थे अक्षतान् समर्पयामि ॥

॥ मुद्रा ॥

(Show mudras as you chant)

निर्वीषी करणार्थे तार्क्ष मुद्रा । (to remove poison)

अमृती करणार्थे धेनु मुद्रा । (to provide nectar - amrit)

पवित्री करणार्थे शङ्ख मुद्रा । (to make auspicious)

संरक्षणार्थे चक्र मुद्रा । (to protect)

विपुलमाया करणार्थे मेरु मुद्रा । (to remove mAyA)

----

१३ शङ्ख पूजन

(pour water from kalasha to shaNkha add gandha flower)

शङ्खं चंद्रार्क दैवतं मध्ये वरुण देवताम् ।

पृष्ठे प्रजापतिं विंद्याद् अग्रे गंगा सरस्वतीम् ॥

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।

नमितः सर्व देवैश्च पाञ्चजन्य नमोऽस्तुते ॥

(This shaNkha has now become like the pAnchajanya, which has come out of the ocean and which is the hands of Lord MahaviShNu. Our prostrations to the pAnchajanya)

पाञ्चजन्याय विद्महे . पावमानाय धीमहि .

तन्नो शङ्खः प्रचोदयात् ॥शङ्खाय नमः .

सकल पूजार्थे अक्षतान् समर्पयामि ॥

----

१४ घंटार्चना

(Pour drops of water from sha~Nkha on top of the bell apply ga.ndha, flower)

आगमार्थन्तु देवानां गमनार्थन्तु राक्षसाम् ।

कुर्वे घंटारवं तत्र देवताह्वा लक्षणम् ॥

ज्ञानथोऽज्ञानतोवापि कांस्य घंटान् नवादयेत् ।

राक्षसानां पिशाचनां तद्देशे वसतिर्भवेत् ।

तस्मात् सर्व प्रयत्नेन घंटानादं प्रकारयेत् ॥

(When the bell is rung, knowingly or unknowingly, all the good spirits are summoned and all the evil spirits are driven away)

घंट देवताभ्यो नमः ।

सकल पूजार्थे अक्षतान् समर्पयामि ॥

(Ring the gha.nTA)

----

१५ आत्मशुद्धि

(Sprinkle water from shaNkha on puja items and devotees)

अपवित्रः पवित्रो वा सर्वावस्थांगतोऽपि वा ।

यः स्मरेत् पुंडरीकाक्षं सः बाह्याभ्यंतरः शुचिः॥

----

१६ नवग्रह अष्ट एवं चतुर्दल देवता पूजन

नवग्रह देवता पूजन

(begin at east go clockwise)

आकृष्णेनाङ्गीरसो हिरण्यस्तुपः सविता त्रिष्टुप्
सुर्यावाहने विनियोगः ||
हिरण्ययेन सवितारतेन् देवो याति भुवनानि पश्यन्
सूर्याय नमः | सूर्यं आवाहयामि ||

आप्यायस्वेति गौतमः सोमो गायत्रि
चन्द्रावाहने विनियोगः ||
ॐ आप्यायस्वसमेतुते विश्वतः सोमवृष्णं
भववाजस्यसन्घदे संघदे
चंद्राय नमः | चन्द्रं आवाहयामि ||

अग्नि मूर्ध विरूपाङ्गारको गायत्रि
अङ्गारकावाहने विनियोगः||
ॐ अग्निमूर्धादिवः ककुथ्पतिः प्रतिव्यायं
आपां रेतांसि जिंवति
अङ्गारकाय नमः| अंगारकं आवाहयामि ||
उद्भुद्ददद्वं सौम्यो बुधः त्रिष्टुप्
बुधावाहने विनियोगः||
ॐ उद्भुद्ददद्वं समनसः सखायः
समग्नि विंद्वं बहवः सनीलः
दधिक्रामग्नि मशसंच देवीमिंद्रवतो
वसनिहवयेवः
बुधाय नमः | बुधं आवाहयामि ||

बृहस्पते घृत्समधो बृहस्पतितित्रिष्टुप्
बृहस्पत्यावाहने विनियोगः ||
बृहस्पते अथियदर्यो अर्हाद्युमद्विभाति कृतुमज्जनेषु
यद्धिदयश्चवास रत प्रजाततदस्मासुद्रविणं देहि चित्रं
बृहस्पतये नमः | बृहस्पतिं आवाहयामि ||

शुक्रांते भारद्वाजः शुक्रः त्रिष्टुप्
शुक्रावाहने विनियोगः ||
ॐ शुक्रांते अन्यद्य जतन्ते अन्यद्विशुरुषे अहनि
दौरिवासि विश्वहिमाया अवसि स्वाध्वो भद्रते
पूशन्निहिरातिरस्तु
शुक्राय नमः | शुक्रं आवाहयामि ||

शमग्निरिरिंबिरः शनैश्चर उष्णिक्
कन्यावाहाने विनियोगः ||
ॐ शमग्निराग्निभिः करश्चन्न तपतु सूर्यः
शंवातो वात्वरपा अपसृधः
शनैश्चराय नमः | शनैश्चरं आवाहयामि ||

कयानो वामदेवो राहुर्गयत्रि राहवाहने विनियोगः ||
ॐ कयानाशित्र आभूव दूथि सदावृधः सखा
कयाशचिष्टया वृथा
राहवे नमः | राहुं आवाहयामि ||

केतुं कृण्वन् मधुश्चंदः केतुर्गायत्रि
केत्वावाहने विनियोगः ||
ॐ केतु कृण्वन् केतवे पेशोमर्य आपेशसे
समुषड्भिरजायतः
केतवे नमः | केतुं आवाहयामि ||

|| अष्टदल देवता पूजन ||

ॐ इंद्राय नमः | अग्नये नमः |
यमाय नमः | नैऋतये नमः |

वरुणाय नमः । वायवे नमः ।
सोमाय नमः । ईशानाय नमः ।

॥ चतुर्दल देवता ॥

ॐ गणपतये नमः । ॐ दुर्गायै नमः ।
ॐ क्षेत्रपालाय नमः । ॐ वसोष्पतये नमः ।

रव्यादि नवग्रह अष्टदल चतुर्दलेषु स्थित
सर्वदेवताभ्यो नमः ॥
ध्यायामि ध्यानं समर्पयामि ।
आवाहनं समर्पयामि ।
आसनं समर्पयामि ।
पाद्यं समर्पयामि ।
अर्घ्यं समर्पयामि ।
आचमनं समर्पयामि ।
स्नानं समर्पयामि ।
वस्त्रं समर्पयामि ।
यज्ञोपवीतं समर्पयामि ।
गंधं धूपं दीपं समर्पयामि ।
नैवेद्यं समर्पयामि ।
मन्त्रपुष्पं समर्पयामि ।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

यस्य स्मृत्याच नाम्नोक्त्या तपः पूजा क्रियादिषु ।
नूनं संपूर्णतां यादि सद्यो वंदे तमच्युतं ॥

(All mistakes in our tapa, puujaa or kriyaa are removed and we are purified by thinking of or uttering the name 'Achyut')

अनया पूजया नवग्रहादि देवता प्रीयताम् ॥

---

१७ षट् पात्र पूजा

(put tulasi leaves or axatAs in empty vessels)

वायव्ये अर्घ्यं ।
नैरृत्ये पाद्यं ।
ईशान्ये आचमनीयं ।
आग्नेये मधुपर्कं ।
पूर्वे स्नानीयं ।
पश्चिमे पुनराचमनं ।

---

१८ पञ्चामृत पूजा

(put tulasi leaves or axataas in vessels|
Panchamrit is nectar of five ingredients -
a mixture of milk, curds, clarified butter (ghee), honey and sugar|)

क्षीरे गोविन्दाय नमः । (keep milk in the centre)
दधिनि वामनाय नमः । (curd facing east)
घृते विष्णवे नमः । (Ghee to the south)
मधुनि मधुसूधनाय नमः । (Honey to west)
शर्करायां अच्युथाय नमः । (Sugar to north)

---

१९ मन्डप द्वारपालक पूजा

पूर्वद्वारे द्वारश्रियै नमः ।
जयाय नमः । विजयाय नमः ।
दक्षिणद्वारे द्वारश्रियै नमः ।
नंदाय नमः । सुनंदाय नमः ॥
पश्चिमद्वारे द्वारश्रियै नमः ।
बलाय नमः । प्रबलाय नमः ॥

उत्तरद्वारे द्वारश्रियै नमः ।

कुमुदाय नमः । कुमुदाक्षाय नमः ॥

मध्ये नव रत्नखचित दिव्य सिंहासनस्योपरि

श्री अनन्तपद्मनाभ स्वामिने नमः ॥

द्वारपालक पूजां समर्पयामि ॥

---

२० पीठ पूजा

पीठस्य अधोभागे आधार शक्त्यै नमः ॥ कूर्माय नमः ॥

दक्षिणे क्षीरोदधिये नमः । सिंहाय नमः ॥

सिंहासनस्य आग्नेय कोणे वराहाय नमः ॥

नैऋत्य कोणे ज्ञानाय नमः ॥

वायव्य कोणे वैराग्याय नमः ॥

ईशान्य कोणे ऐश्वर्याय नमः ॥

पूर्व दिशे धर्माय नमः ॥

दक्षिण दिशे ज्ञानाय नमः ॥

पश्चिम दिशे वैराग्याय नमः ॥

उत्तर दिशे अनैश्चराय नमः ॥

पीठ मध्ये मूलाय नमः ॥

नालाय नमः ॥

पत्रेभ्यो नमः ॥

केसरेभ्यो नमः ॥

कर्णिकायै नमः ॥

कर्णिका मध्ये सं सत्त्वाय नमः ॥

रं रजसे नमः ॥ तं तमसे नमः ॥

सूर्यमण्डलाय नमः ॥

सूर्यमण्डलाधिपतये ब्रह्मणे नमः ॥

सोममण्डलाय नमः ॥

सोममण्डलाधिपतये विष्णवे नमः ॥

वह्निमण्डलाय नमः ॥

वह्निमण्डलाधिपतये ईश्वराय नमः ॥

श्री अनन्तपद्मनाभाय नमः । पीठ पूजां समर्पयामि ॥

---

२१ दिग्पालक पूजा

(start from east of kalasha or deity)

इंद्राय नमः,

अग्नये नमः,

यमाय नमः,

नैऋतये नमः,

वरुणाय नमः,

वायवे नमः,

कुबेराय नमः,

ईशानाय नमः,

इति दिग्पालक पूजां समर्पयामि

---

२२ प्राण प्रतिष्ठा

(hold flowers/axata in hand)

ध्यायेत् सत्यम् गुणातीतं गुणत्रय समन्वितं

लोकनाथं त्रिलोकेशं कौस्तुभाभरणं हरिम् ।

नीलवर्णं पीतवासं श्रीवत्सपदभूषितं

गोकुलानन्दं ब्रह्माध्यैरपि पूजितम् ॥

ॐ अस्य श्री प्राण प्रतिष्ठापन महा मन्त्रस्य
ब्रह्मा विष्णु महेश्वरा ऋषयः ।
ऋग्यजुः सामाथर्वाणि छन्दांसि ।
सकलजगत्सृष्टिस्थिति संहारकारिणी
प्राणशक्तिः परा देवता ।
आं बीजम् । ह्रीं शक्तिः । क्रौम् कीलकम् ।
अस्यां मूर्तौ प्राण प्रतिष्ठापने विनियोगः ॥

॥ करन्यासः ॥

आं अंगुष्ठाभ्यां नमः ॥
ह्रीं तर्जनीभ्यां नमः ॥
क्रौं मध्यमाभ्यां नमः ॥
आं अनामिकाभ्यां नमः ॥
ह्रीं कनिष्ठिकाभ्यां नमः ॥
क्रौं करतलकरपृष्ठाभ्यां नमः ॥

॥ अङ्ग न्यासः ॥

आं हृदयाय नमः ॥
ह्रीं शिरसे स्वाहाः ॥
क्रौं शिखायै वषट् ॥
आं कवचाय हुं ॥
ह्रीं नेत्रत्रयाय वौषट् ॥
क्रौं अस्त्राय फट् ॥
भूर्भुवस्वरोम् इति दिग्बन्धः ॥

आं ह्रीं क्रौम् क्रौम् ह्रीं आं ।
य र ल व श ष स ह ।

ॐ अहं सः सोऽहं सोऽहं अहं सः ॥

अस्यां मूर्ते प्राणः तिष्ठंतुः । अस्यां मूर्ते जीवः
तिष्ठन्तु ।
अस्यां मूर्ते सर्वेन्द्रियाणि मनस्त्वत् चक्षुः
श्रोत्र जिह्वा घ्राणैः वाक्वाणि पादपायोपस्थानि
प्राण अपान व्यान उदान समान अत्रागत्य
सुखेन चिरं तिष्ठन्तु स्वाहाः ।

असुनीते पुनरस्मासु चक्षुवः पुनः प्राणमिहीनो
देहिभोगं ज्योक्ष क्षेम सूर्यमुच्चरन्तम् अनुमते
मृडयान स्वस्ति अमृतं वै प्राणा अमृतमापः
प्राणानेव यथा स्थानं उपह्वयेत् ॥

स्वामिन् सर्व जगन्नाथ यावत्पूजावसानकं
तावत्वम् प्रीतिभावेन बिम्बेस्मिन् कलशेस्मिन्
प्रतिमायां सन्निधिं कुरु ॥
इति प्राणं प्रतिष्ठापयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

---

२३ ध्यानं

ॐ ॐ (repeat 15 times)
ॐ शान्ताकारम् भुजगशयनम् पद्मनाभम् सुरेशम्।
विश्वाधारम् गगनसदृशम् मेघवर्णम् शुभाङ्गम्॥
लक्ष्मीकान्तम् कमलनयनम् योगिहृद्ध्यानगम्यम्।
वन्दे विष्णुम् भवभयहरम् सर्वलोकैकनाथम्॥

(you can add more related shlokas)

ॐ श्री अनन्तपद्मनाभाय नमः ।
ध्यानात् ध्यानं समर्पयामि

---

२४ आवाहनं

(hold flowers in hand)

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम् ।।

आगच्छ देवदेवेश तेजोराशे जगत्पते ।
क्रियमाणां मया पूजां गृहाण सुरसत्तमे ।।

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ।।

श्री लक्ष्मी सहित श्री अनन्तपद्मनाभाय
सांगाय सपरिवाराय सायुधाय
सशक्तिकाय नमः ।
श्री लक्ष्मी सहित श्री अनन्तपद्मनाभं सांगं
सपरिवारं सायुधं सशक्तिकं आवाहयामि ।।

(offer flowers to Lord)

आवाहितो भव । स्थापितो भव । सन्निहितो भव ।
सन्निरुद्धो भव । अवकुण्ठितो भव । सुप्रीतो भव ।
सुप्रसन्नो भव । सुमुखो भव । वरदो भव ।
प्रसीद प्रसीद ।।

(show mudras to Lord)

---

२५ आसनं

पुरुष एवेदगं सर्वम् यद्भूतं यच्छ भव्यम् ।
उतामृतत्वस्येशानः यदन्नेनातिरोहति ।।

अनन्ताय नमस्तेस्तु सहस्र शिरसे नमः।
नमोस्तु पद्मनाभाय नागाधिपतये नमः ।।
ॐ श्री अनन्तपद्मनाभाय नमः । आसनं
समर्पयामि।।

(offer flowers/axathaas)

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ।।
आसनं समर्पयामि ।।

---

२६ पाद्यं

(offer water)

एतावानस्य महिमा अतो ज्यायागंश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।।

अनन्त देवदेवेश पुराण पुरुषोत्तम |
पाद्यम् गृहाण भगवन् गन्धपुष्पाक्षतैर्युतं .

ॐ श्री अनन्तपद्मनाभाय नमः । पादोयो पाद्यं
समर्पयामि ।।
अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ।।
पादोयो पाद्यं समर्पयामि ।।

---

२७ अर्घ्यं
(offer water)

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवात्पुनः ।
ततो विश्वङ्व्यक्रामत् साशनानशने अभि ।।

अनन्त देवदेवेश अनन्त फलदायक ।
अनन्त मूर्ते विश्वात्मान् ग्रहाणर्घ्यं नमोस्तुते ।।
ॐ श्री अनन्तपद्मनाभाय नमः । अर्घ्यम् समर्पयामि।।

कांसोस्मि तां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ।।
अर्घ्यं समर्पयामि ।।

---

२८ आचमनीयं
(offer water or axathaa/ leave/flower)

तस्माद्विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ।।

कर्पूर वासितं तोयं मन्दाकिन्यः समाहृतम् ।
आचम्यतां जगन्नाथ मयाधत्तं हि भक्तिथः ।।

ॐ श्री अनन्तपद्मनाभाय नमः । आचमनीयं समर्पयामि ।।

चन्द्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ।।
आचमनीयं समर्पयामि ।।

---

२९ स्नानं
यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यम् ग्रीष्म इध्मश्शरद्धविः ।।

गङ्गाच यमुनाश्चैव नर्मदाश्च सरस्वती ।
तापि पयोष्णि रेवच ताभ्यः स्नानार्थमाहृतं ।।

ॐ श्री अनन्तपद्मनाभाय नमः । मलापकर्श स्नानं समर्पयामि ।।

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसानुदन्तुमायान्तरायाश्च बाह्या अलक्ष्मीः ।।

---

२९. १ पञ्चामृत स्नानं
२९.१. १ पय स्नानं (milk bath)

ॐ आप्याय स्व स्वसमेतुते
विश्वतः सोमवृष्ण्यं भवावाजस्य संगथे ।।

सुरभेस्तु समुत्पन्नं देवानां अपि दुर्लभम् ।
पयो दधामि देवेश स्नानार्थं प्रतिगृह्यताम् ।।

ॐ श्री अनन्तपद्मनाभाय नमः । पयः स्नानं समर्पयामि ।।
पयः स्नानानंतर शुद्धोदक स्नानं समर्पयामि ।।
सकल पूजार्थे अक्षतान् समर्पयामि ।।

---

२९. १. २ दधि स्नानं (curd bath)

ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्यवाजिनः ।
सुरभिनो मुखाकरत् प्राण आयुंषि तारिषत् ।।

चन्द्र मन्डल सम्काशं सर्व देव प्रियं हि यत् ।
दधि ददामि देवेश स्नानार्थं प्रतिगृह्यताम् ।।
ॐ श्री अनन्तपद्मनाभाय नमः । दधि स्नानं समर्पयामि ।।
दधि स्नानानंतर शुद्धोदक स्नानं समर्पयामि ।।
सकल पूजार्थे अक्षतान् समर्पयामि ।।

---

२९. १. ३ घृत स्नानं (ghee bath)

ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतंवस्यधाम
अनुष्ठधमावह मादयस्व स्वाहाकृतं वृषभ वक्षिहव्यं।।

आज्यं सुरानां आहारं आज्यं यज्ञे प्रतिष्ठितम् ।
आज्यं पवित्रं परमं स्नानार्थं प्रतिगृह्यताम् ।।

ॐ श्री अनन्तपद्मनाभाय नमः । घृत स्नानं समर्पयामि ।।
घृत स्नानानंतर शुद्धोदक स्नानं समर्पयामि ।।
सकल पूजार्थे अक्षतान् समर्पयामि ।।

---

२९. १. ४ मधु स्नानं (Honey bath)

ॐ मधुवात ऋतायते मधुक्षरंति सिन्धवः माध्विनः संतोष्वधीः
मधुनक्ता मुतोषसो मधुमत् पार्थिवं रजः मधुद्यौ रस्तुनः पिता
मधुमान्नो वनस्पतिर् मधुमाँ अस्तु सूर्यः
माध्वीर्गावो भवंतु नः ॥
सर्वौषधि समुत्पन्नं पीयुष सदृशं मधु ।
स्नानार्थं मया दत्तं गृहाण परमेश्वर ।।

ॐ श्री अनन्तपद्मनाभाय नमः । मधु स्नानं समर्पयामि ।।
मधु स्नानानंतर शुद्धोदक स्नानं समर्पयामि ।।
सकल पूजार्थे अक्षतान् समर्पयामि ।।

---

२९. १. ५ शर्करा स्नानं (sugar bath)

ॐ स्वाधुः पवस्य दिव्याय जन्मने
स्वादुरिन्द्राय सुहवीतु नाम्ने
स्वादुर्मित्राय वरुणाय वायवे
बृहस्पतये मधुमाँ अदाभ्यः ॥

इक्षु दण्डात् समुत्पन्ना, रसस्निग्धतरा शुभा
शर्करेयं मया दत्ता, स्नानार्तं प्रतिगृह्यताम्

ॐ श्री अनन्तपद्मनाभाय नमः । शर्करा स्नानं समर्पयामि ।।
शर्करा स्नानानंतर शुद्धोदक स्नानं समर्पयामि ।।

सकल पूजार्थे अक्षतान् समर्पयामि ॥

---

२९. २ गंधोदक स्नानं (Sandalwood water bath)

ॐ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ।
ईश्वरीं सर्व भूतानां तामि होप व्हयेश्रियं ॥

हरि चंदन संभूतं हरि प्रीतेश्च गौरवात् ।
सुरभि प्रिय गोविन्द गंध स्नानाय गृह्यतां ॥
ॐ श्री अनन्तपद्मनाभाय नमः । गंधोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

---

२९. ३ अभ्यंग स्नानं (Perfumed Oil bath)
ॐ कनिक्रदज्वनुशं प्रभ्रुवान। इयथिर्वाचमरितेव नावं।
सुमंगलश्च शकुने भवासि मात्वा काचिदभिभाविश्व्या विदत ॥

अभ्यंगार्थं महीपाल तैलं पुष्पादि संभवं ।
सुगंध द्रव्य संमिश्रं संगृहाण जगत्पते ॥

ॐ श्री अनन्तपद्मनाभाय नमः । अभ्यंग स्नानं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

---

२९. ४ अंगोद्वर्तनकं (To clean the body)

अंगोद्वर्तनकं देव कस्तूर्यादि विमिश्रितं ।
लेपनार्थं गृहाणेदं हरिद्रा कुंकुमैर्युतं ॥

ॐ श्री अनन्तपद्मनाभाय नमः । अंगोद्वर्तनं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

---

२९. ५ उष्णोदक स्नानं (Hot water bath)

नाना तीर्थादाहृतं च तोयमुष्णं मयाकृतं ।
स्नानार्थं च प्रयच्छामि स्वीकुरुश्व दयानिधे ॥
ॐ श्री अनन्तपद्मनाभाय नमः । उष्णोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

---

२९. ६ शुद्धोदक स्नानं (Pure water bath)
sprinkle water all around
ॐ आपोहिष्टा मयो भुवः । ता न ऊर्जे दधातन ।
महेरणाय चक्षसे । यो वः शिवतमो रसः
तस्यभाजयते ह नः ।
उशतीरिव मातरः । तस्मा अरंगमामवो । यस्य
क्षयाय जिन्वथ । आपो जनयथा च नः ॥

ॐ श्री अनन्तपद्मनाभाय नमः । शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥
(after sprinkling water around throw one tulasi leaf to the north)

---

३० महा अभिषेकः
(Sound the bell pour water from kalasha)

३०.१ पुरुष सूक्त

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम् ।।
१।।
पुरुष एवेदगं सर्वम् यद्भूतं यच्छ भव्यम् ।
उतामृतत्वस्येशानः यदन्नेनातिरोहति ।। २।।
एतावानस्य महिमा अतो ज्यायागंश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।। ३।।
त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवात्पुनः ।
ततो विश्वङ्व्यक्रामत् साशनानशने अभि ।। ४।।
तस्माद्विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ।। ५।।
यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यम् ग्रीष्म इध्मश्शरद्धविः
।।६।।
सप्तास्यासन् परिधयः त्रिस्सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वानाः अबध्नन्पुरुषं पशुम् ।
तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ।। ७।।
तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ।
पशूगँस्तागंश्चक्रे वायव्यान् आरण्यान्
ग्राम्याश्चये।।८।।
तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे ।
छन्दाँसि जज्ञिरे तस्मात् यजुस्तस्मादजायत ।।९।।
तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता
अजावयः।।१०।।
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू कावूरू पादावुच्येते ।। ११।।
ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः ।
उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ।। १२।।
चन्द्रमा मनसो जातः चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ।। १३।।
नाभ्या आसीदन्तरिक्षम् शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ
अकल्पयन्।।१४।।
वेदाहमेतं पुरुषं महान्तम्
आदित्यवर्णं तमसस्तु पारे ।
सर्वाणि रूपाणि विचित्य धीरः
नामानि कृत्वाऽभिवदन् यदास्ते ।। १५।।
धाता पुरस्ताद्यमुदाजहार
शक्रः प्रविद्वान्प्रदिशश्चतस्रः ।
तमेवं विद्यानमृत इह भवति
नान्यः पन्था अयनाय विद्यते ।। १६।।
यज्ञेन यज्ञमयजन्त देवाः
तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्ते
यत्र पूर्वे साध्याः सन्ति देवाः ।। १७।।
ॐ श्री अनन्तपद्मनाभाय नमः । पुरुषसूक्त स्नानं
समर्पयामि। ।।

३०.२ श्री सूक्त

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् |
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह || १||
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् |
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् || २ ||

अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम् |
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् || ३ ||
कांसोस्मि तां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां
तर्पयन्तीम् |
पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् || ४ ||
चन्द्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके
देवजुष्टामुदाराम् |
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां
वृणे || ५ ||
आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ
बिल्वः |
तस्य फलानि तपसानुदन्तुमायान्तरायाश्च बाह्या
अलक्ष्मीः ।। ६ ।।
उपैतु मां देवसखः कीर्तिश्च मणिना सह |
प्रादुर्भूतोऽस्मि राष्ट्रेस्मिन्कीर्तिमृद्धिं ददातु मे || ७ ||
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् |
अभूतिमसमृद्धिं च सर्वां निर्णुदमे गृहात् || ८ ||
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् |
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् || ९ ||
मनसः काममाकूतिं वाचः सत्यमशीमहि |
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः || १० ||
कर्दमेन प्रजाभूतामयि सम्भवकर्दम |
श्रियं वासय मे कुले मातरं पद्ममालिनीम् || ११ ||
आपः सृजन्तु स्निग्धानि चिक्लीतवसमे गृहे |
निचदेवीं मातरं श्रियं वासय मे कुले || १२ ||
आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् |
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह || १३ ||
आर्द्रां यःकरिणीं यष्टिं पिङ्गलां पद्ममालिनीम् |
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह || १४ ||

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् |
यस्यां हिरण्यं प्रभूतं गावोदास्योश्वान्विन्देयं
पुरुषानहम् || १५ ||
यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् |
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् || १६ ||
पद्मानने पद्म ऊरू पद्माक्षी पद्मसम्भवे |
तन्मेभजसि पद्माक्षी येन सौख्यं लभाम्यहम् || १७
||
अश्वदायी गोदायी धनदायी महाधने |
धनं मे जुषतां देवि सर्वकामांश्च देहि मे || १८ ||
पद्मानने पद्मविपद्मपत्रे पद्मप्रिये पद्मदलायताक्षि
|
विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि
संनिधत्स्व || १९ ||
पुत्रपौत्रं धनं धान्यं हस्त्यश्वादिगवेरथम् |
प्रजानां भवसि माता आयुष्मन्तं करोतु मे || २० ||
धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः |
धनमिन्द्रो बृहस्पतिर्वरुणं धनमस्तु ते || २१ ||
वैनतेय सोमं पिब सोमं पिबतु वृत्रहा |
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः || २३ ||
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः । ।
भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत्।।२४ ।।
सरसिजनिलये सरोजहस्ते
धवलतरांशुकगन्धमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद
मह्यम् ।। २५ ।।
विष्णुपत्नीं क्षमादेवीं माधवीं माधवप्रियाम् ।
लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ।।२६ ।।
महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि ।

तन्नो लक्ष्मीः प्रचोदयात् ।। २७ ।।
श्रीवर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते ।
धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं
दीर्घमायुः।।२८।।

ॐ श्री अनन्तपद्मनाभाय नमः | श्री सूक्त स्नानं
समर्पयामि ||

---

३०. ३ विष्णु सूक्त

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे ।
पर्थिव्याः सप्त धामभिः ।।
इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं ।
समूढमस्यपाँसुरे ।।
त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः ।
ततो धर्माणि धारयन् ।।
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ।
इन्द्रस्य युज्यः सखा ।।
तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ।।
तद् विप्रासो विपन्यवो जागृवाँसस्समिन्धते ।
विष्णोर् यत् परमं पदं ।।
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो
हस्ताभ्याम् ।
अग्नेस्तेजसा सूर्यश्च अर्चसेन्द्रस्यं
इन्द्रियेनाभिशिञ्चामि ।।
बलाय श्रियै यशसेन्नाध्याय अमृताभिषेको अस्तु ।
शान्तिः पुष्टिः तुष्टिः च अस्तु ।।

ॐ श्री अनन्तपद्मनाभाय नमः । महा अभिषेक
स्नानं समर्पयामि ।।

---

३१ प्रतिष्ठापना

ॐ श्री अनन्तपद्मनाभाय नमः | (repeat 12 times)

ॐ तदुस्तु मित्रा वरुणा तदग्ने शंयोरस्मभ्यमिदम
स्तुशस्तम् |
अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते
साधनाय||
ॐ गृहावै प्रतिष्ठासूक्तं तत् प्रतिष्टित तमया वाचा |
शं स्तव्यं तस्माद्यद्यपिदूर इव पशून् लभते |
ग्रहानेवै नानाजिगमिशति गृहाहि पशूनां प्रतिष्ठा
प्रतिष्ठा ||

ॐ श्री अनन्तपद्मनाभाय सांगाय सपरिवाराय
सायुधाय
सशक्तिकाय नमः । श्री अनन्तपद्मनाभं सांगं
सपरिवारं सायुधं सशक्तिकं आवाहयामि ।।
श्री लक्ष्मी सहित श्री अनन्तपद्मनाभाय नमः ।।
सुप्रतिष्ठमस्तु ।।

---

३२ वस्त्र

(offer two pieces of cloth for the Lord)

ॐ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ।।

ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह |
प्रादुर्भूतोऽस्मि राष्ट्रेस्मिन्कीर्तिमृद्धिं ददातु मे ||

तप्त कान्चन संकाशं पीताम्बरं इदं हरे
संगृहाण जगन्नाथ अनन्तपद्मनाभ नमोऽस्तुते

ॐ श्री अनन्तपद्मनाभाय नमः | वस्त्रयुग्मं समर्पयामि ||

---

३३ श्री महा लक्ष्मी पूजा

३३. १ कंचुकी

नवरत्नाभिर्दधां सौवर्णैश्चैव तंतुभिः ।
निर्मितां कंचुकीं भक्त्या गृहाण परमेश्वरी ।।
ॐ श्री महा लक्ष्म्यै नमः। कंचुकीं समर्पयामि ।।

---

३३. २ कण्ठ सूत्र

मांगल्य तंतुमणिभिः मुक्तैश्चैव विराजितं ।
सौमंगल्ल्याभिवृध्यर्थं कंठसूत्रं ददामिते ।।
ॐ श्री महा लक्ष्म्यै नमः । कंठसूत्रं समर्पयामि ।।

---

३३. ३ ताडपत्राणि

ताडपत्राणि दिव्याणि विचित्राणि शुभानि च ।
कराभरणयुक्तानि मातस्तत्प्रतिगृह्यतां ।।
ॐ श्री महा लक्ष्म्यै नमः ताडपत्राणि समर्पयामि ।।

---

३३. ४ हरिद्रा

हरिद्रा रंजिते देवी सुख सौभाग्य दायिनी ।
हरिद्रांते प्रदास्यामि गृहाण परमेश्वरि ।।
ॐ श्री महा लक्ष्म्यै नमः । हरिद्रा समर्पयामि ।।

---

३३. ५ कुंकुम

कुंकुमं कामदां दिव्यं कामिनी काम संभवं ।
कुंकुमार्चिते देवी सौभाग्यार्थं प्रतिगृह्यतां ।।
ॐ श्री महा लक्ष्म्यै नमः । कुंकुमं समर्पयामि ।।

---

३३. ६ कज्जल

सुनील भ्रमराभसं कज्जलं नेत्र मण्डनं ।
मयादत्तमिदं भक्त्या कज्जलं प्रतिगृह्यतां ।।
ॐ श्री महा लक्ष्म्यै नमः । कज्जलं समर्पयामि ।।

---

३३. ७ सिंदूर

विद्युत् कृशाणु संकाशं जपा कुसुमसन्निभं ।
सिन्दूरंते प्रदास्यामि सौभाग्यं देहि मे चिरं ।।
ॐ श्री महा लक्ष्म्यै नमः । सिन्दूरं समर्पयामि ।।

---

३३. ८ नाना आभरणं

स्वभावा सुन्दरांगि त्वं नाना रत्न युतानि च ।
भूषणानि विचित्राणि प्रीत्यर्थं प्रतिगृह्यतां ।।
ॐ श्री महा लक्ष्म्यै नमः । नाना आभरणानि समर्पयामि ।।

---

३३. ९ नाना परिमल द्रव्य

नाना सुगन्धिकं द्रव्यं चूर्णीकृत्य प्रयत्नतः ।
ददामि ते नमस्तुभ्यं प्रीत्यर्थं प्रतिगृह्यतां ।।
ॐ श्री महा लक्ष्म्यै नमः । नाना परिमल द्रव्यं समर्पयामि ।।

---

३४ यज्ञोपवीत

तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ।
पशूँस्तागंश्चक्रे वायव्यान् आरण्यान् ग्राम्याश्चये।।
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् |
अभूतिमसमृद्धिं च सर्वां निर्णुदमे गृहात् ||
ब्रह्मा विष्णु महेशश्च निर्मितं ब्रह्मसूत्रकं ।
यज्ञोपवीतं तद्दानात् प्रीयतां कमलापतिः ।।

ॐ श्री अनन्तपद्मनाभाय नमः | यज्ञोपवीतम् समर्पयामि ||

---

३५ आभरणं हस्तभूषण

गृहाण नानाभरणानि अनन्तपद्मनाभाय निर्मितानि ।
ललाट कंठोत्तम कर्ण हस्त नितम्ब हस्तांगुलि भूषणानि ।।
ॐ श्री अनन्तपद्मनाभाय नमः । आभरणानि समर्पयामि ।।
ॐ श्री अनन्तपद्मनाभाय नमः | हस्तभूषणं समर्पयामि ||

---

३६ गंध

तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे ।
छन्दाँसि जज्ञिरे तस्मात् यजुस्तस्मादजायत ।।
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् |
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ||
गौरोचन चंदन देवदारु कर्पूर कृष्णागरु नागराणि ।
कस्तूरिका केसर मिश्रितानि यथोचितं अनन्तमयार्पितानि ।।

ॐ श्री अनन्तपद्मनाभाय नमः | गंधं समर्पयामि||

---

३७ नाना परिमल द्रव्य

अहिरिव भोगैः पर्येति बाहुं जयाया हेतिं परिबाधमानः|
हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमांसं परि पातु विश्वतः ||
ॐ श्री अनन्तपद्मनाभाय नमः | नाना परिमल द्रव्यं समर्पयामि ||

---

३८ अक्षत

तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः।।
मनसः काममाकूतिं वाचः सत्यमशीमहि |
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ||
श्वेत तण्डुल संयुक्तान् कुङ्कुमेन विराजितान् |
अक्षतान् गृह्यताम् देव नारायण नमोऽस्तुते ||

श्री अनन्तपद्मनाभाय नमः| अक्षतान् समर्पयामि ||

---

३९ पुष्प

माल्यादीनि सुगन्धीनि माल्यतादीनि वैप्रभो ।
मया ह्तानि पूजार्थं पुष्पाणि प्रतिगृह्यताम् ।।
ॐ श्री अनन्तपद्मनाभाय नमः । पुष्पाणि समर्पयामि।।

तुलसी कुन्दमन्दार पारिजाताम्बुजैर्युतां
पञ्चभिर्ग्रथिता माला वैजयंति कथ्यते ।।

ॐ श्री अनन्तपद्मनाभाय नमः । वैजयंती माला समर्पयामि ।।

---

४० नाना अलंकार

कटि सूताङ्गुली येच कुण्डले मुकुठं तथा ।
वनमालां कौस्तुभं च गृहाण पुरुषोत्तम ।।
ॐ श्री अनन्तपद्मनाभाय नमः | नाना अलंकारान् समर्पयामि ||

---

४१ अथ अङ्गपूजा

ॐ मत्स्याय नमः । पादौ पूजयामि ।।
ॐ कूर्माय नमः । गुल्फ़ौ पूजयामि ।।
ॐ वराहाय नमः । जानुनी पूजयामि ।।
ॐ नारसिम्हाय नमः । जंघे पूजयामि ।।
ॐ वामनाय नमः । ऊरून् पूजयामि ।।
ॐ परशुरामाय नमः । गुह्यं पूजयामि ।।
ॐ रामाय नमः । जघनं पूजयामि ।।
ॐ कृष्णाय नमः । कटिं पूजयामि ।।
ॐ बुद्धाय नमः । उदरं पूजयामि ।।
ॐ कल्किने नमः । हृदयं पूजयामि ।।

ॐ श्री अनन्तपद्मनाभाय नमः सर्वाङ्गानि पूजयामि।।

---

४१. १ अथ ग्रन्थि पूजा

ॐ अनन्ताय नमः | प्रथम ग्रन्थिं पूजयामि ||
ॐ कपिलाय नमः | द्वितीय ग्रन्थिं पूजयामि ||
ॐ नागाधिपतये नमः | तृतीय ग्रन्थिं पूजयामि ||
ॐ शेषाय नमः | चतुर्थ ग्रन्थिं पूजयामि ||
ॐ तालकाय नमः | पंचम ग्रन्थिं पूजयामि ||
ॐ कामपालाय नमः | षष्ठ ग्रन्थिं पूजयामि ||
ॐ हलायुधाय नमः | सप्तम ग्रन्थिं पूजयामि ||
ॐ शिरः पाणये नमः | अष्टम ग्रन्थिं पूजयामि ||
ॐ बलबद्राय नमः | नवम ग्रन्थिं पूजयामि ||
ॐ मुसलिने नमः | दशम ग्रन्थिं पूजयामि ||
ॐ अच्युताय नमः | एकादश ग्रन्थिं पूजयामि ||
ॐ कालनाताय नमः | द्वादश ग्रन्थिं पूजयामि ||
ॐ सहस्रफणामनिभूशिताय नमः | त्रयोदश ग्रन्थिं पूजयामि ||
ॐ सहस्रशिरसे नमः | चतुर्दश ग्रन्थिं पूजयामि ||

---

४२ अथ पुष्प पूजा

ॐ कृष्णाय नमः । करवीर पुष्पं समर्पयामि ।।
ॐ ब्रह्मणे नमः । जाजी पुष्पं समर्पयामि ।।
ॐ भास्कराय नमः । चम्पका पुष्पं समर्पयामि ।।
ॐ शिवाय नमः । वकुल पुष्पं समर्पयामि ।।
ॐ विष्णवे नमः । शतपत्र पुष्पं समर्पयामि ।।

ॐ हरये नमः । कल्हार पुष्पं समर्पयामि ।।
ॐ शेषाय नमः । सेवन्तिका पुष्पं समर्पयामि।।
ॐ सर्वव्यापिने नमः । मल्लिका पुष्पं समर्पयामि ।।
ॐ ईश्वराय नमः । इरुवंतिका पुष्पं समर्पयामि।।
ॐ विश्वरूपाय नमः । गिरिकर्णिका पुष्पं समर्पयामि।।

ॐ महाकायाय नमः । आथसी पुष्पं समर्पयामि ।।

ॐ सृष्टि स्थित्यन्तकाय नमः । पारिजात पुष्पं समर्पयामि ।।
ॐ अनन्ताय नमः । पुन्नाग पुष्पं समर्पयामि।।
ॐ नागाधिपतये नमः । कुन्द पुष्पं समर्पयामि ।।
श्री अनन्तपद्मनाभ स्वामिने नमः । पुष्पपूजां समर्पयामि ।।

---

४३ अथ पत्र पूजा

ॐ जगन्नाथाय नमः । तुलसी पत्रं समर्पयामि ।।
ॐ वराहाय नमः । जाजी पत्रं समर्पयामि ।।
ॐ धरणीधराय नमः । चम्पका पत्रं समर्पयामि ।।
ॐ मुकुन्दाय नमः । बिल्व पत्रं समर्पयामि ।।
ॐ सहस्राक्षाय नमः । दूर्वायुग्मं समर्पयामि ।।

ॐ अचंचलाय नमः । सेवन्तिका पत्रं समर्पयामि ।।
ॐ कृष्णाय नमः । मरुग पत्रं समर्पयामि ।।
ॐ विष्णवे नमः । दवन पत्रं समर्पयामि ।।
ॐ शिवाय नमः । करवीर पत्रं समर्पयामि ।।
ॐ भास्कराय नमः । विष्णु क्रान्ति पत्रं समर्पयामि।।

ॐ त्रिमूर्तये नमः । माचि पत्रं समर्पयामि ।।
ॐ पद्मनाभाय नमः । मल्लिका पत्रं समर्पयामि ।।
ॐ मधुसूदनाय नमः। इरुवन्तिका पत्रं समर्पयामि ।।
ॐ सर्वव्यापिने नमः । अपामार्ग पत्रं समर्पयामि ।।
ॐ विश्वरूपाय नमः । पारिजात पत्रं समर्पयामि ।।
ॐ अनन्तपद्मनाभ स्वामिने नमः । पत्रपूजां समर्पयामि ।।

---

४४ नाम पूजा

ॐ केशवाय नमः । ॐ नारायणाय नमः ।
ॐ माधवाय नमः । ॐ गोविंदाय नमः ।
ॐ विष्णवे नमः । ॐ मधुसूदनाय नमः ।
ॐ त्रिविक्रमाय नमः । ॐ वामनाय नमः ।
ॐ श्रीधराय नमः । ॐ हृषीकेशाय नमः ।
ॐ पद्मनाभाय नमः । ॐ दामोदराय नमः ।
ॐ संकर्षणाय नमः । ॐ वासुदेवाय नमः ।
ॐ प्रद्युम्नाय नमः । ॐ अनिरुद्धाय नमः ।
ॐ पुरुषोत्तमाय नमः । ॐ अधोक्षजाय नमः ।
ॐ नारसिंहाय नमः । ॐ अच्युताय नमः ।
ॐ जनार्दनाय नमः । ॐ उपेंद्राय नमः ।
ॐ हरिये नमः । ॐ श्री कृष्णाय नमः ।
ॐ परशुरामाय नमः । ॐ रामाय नमः ।
ॐ बुद्धाय नमः । ॐ कल्किने नमः

ॐ श्री अनन्तपद्मनाभाय नमः ।
नाम पूजां समर्पयामि

---

४५ लक्ष्मी नाम पूजा

ॐ महालक्ष्म्यै नमः ।
ॐ कमलायै नमः ।
ॐ पद्मासनयै नमः ।
ॐ सोमायै नमः ।

ॐ चन्डिकायै नमः ।
ॐ अनघायै नमः ।
ॐ रमायै नमः ।
ॐ पीताम्बरधारिण्यै नमः ।
ॐ दिव्यगन्धानुलेपनायै नमः ।
ॐ सुरूपायै नमः ।
ॐ रत्नदीप्तायै नमः ।
ॐ वाञ्चितार्थप्रदायिन्यै नमः ।
ॐ इंदिरायै नमः ।
ॐ नारायणायै नमः ।
ॐ कंबु ग्रीवायै नमः ।
ॐ हरिप्रियायै नमः ।
ॐ शुभदायै नमः ।
ॐ लोकमात्रे नमः ।
ॐ दैत्यदर्पापहारिण्यै नमः ।
ॐ सुरासुरपूजितायै नमः ।
ॐ महा लक्ष्म्यै नमः ।
ॐ लक्ष्मी नाम पूजां समर्पयामि।

---

४६ आवरण पूजा

---

४६. १ प्रथमावरण पूजा

ॐ नारायणाय नमः ।
ॐ नराय नमः ।
ॐ अच्युताय नमः ।
ॐ आदिमध्यांत शून्याय नमः ।
ॐ विष्णवे नमः ।
ॐ हरये नमः ।
ॐ सृष्टिस्थितिसंहारकाय नमः ।
ॐ दामोदराय नमः
श्री अनन्तपद्मनाभ स्वामिने नमः
प्रथमावरण पूजां समर्पयामि।

---

४६. २ द्वितीयावरण पूजा

ॐ ऋग्वेदाय नमः ।
ॐ यजुर्वेदाय नमः ।
ॐ सामवेदाय नमः ।
ॐ अथर्वण वेदाय नमः ।
ॐ वह्निमण्डलाय नमः ।
ॐ सूर्यमण्डलाय नमः ।
ॐ सोमैमण्डलाय नमः ।
ॐ श्री अनन्तपद्मनाभ स्वामिने नमः ।
द्वितीयावरण पूजां समर्पयामि

---

४६. ३ तृतीयावरण पूजा

ॐ केशवाय नमः ।
ॐ नारायणाय नमः ।
ॐ माधवाय नमः ।
ॐ गोविंदाय नमः ।
ॐ विष्णवे नमः ।
ॐ मधुसूदनाय नमः ।
ॐ त्रिविक्रमाय नमः ।
ॐ वामनाय नमः ।
ॐ श्रीधराय नमः ।
ॐ हृषीकेशाय नमः ।
ॐ पद्मनाभाय नमः ।
ॐ दामोदराय नमः ।
ॐ संकर्षणाय नमः ।
ॐ वासुदेवाय नमः ।
ॐ प्रद्युम्नाय नमः ।

ॐ अनिरुद्धाय नमः ।
ॐ पुरुषोत्तमाय नमः ।
ॐ अधोक्षजाय नमः ।
ॐ नारसिंहाय नमः ।
ॐ अच्युताय नमः ।
ॐ जनार्दनाय नमः ।
ॐ उपेंद्राय नमः ।
ॐ हरये नमः ।
श्री कृष्णाय नमः ।
श्री अनन्तपद्मनाभ स्वामिने नमः ।
तृतीयावरण पूजां समर्पयामि

---

४६. ४ चतुर्थावरण पूजा

ॐ सूर्याय नमः ।
ॐ सोमाय नमः ।
ॐ अङ्गारकाय नमः ।
ॐ बुधाय नमः ।
ॐ बृहस्पतये नमः ।
ॐ शुक्राय नमः ।
ॐ शनैश्चराय नमः ।
ॐ राहवे नमः
ॐ केतवे नमः ।
ॐ श्री अनन्तपद्मनाभ स्वामिने नमः ।
चतुर्थावरण पूजां समर्पयामि

---

४६. ५ पञ्चमावरण पूजा

ॐ इंद्राय नमः ।
ॐ अग्नये नमः ।
ॐ यमाय नमः ।
ॐ नैऋतये नमः ।
ॐ वरुणाय नमः ।
ॐ वायव्ये नमः ।
ॐ कुबेराय नमः ।
ॐ ईशानाय नमः ।
ॐ श्री अनन्तपद्मनाभ स्वामिने नमः ।
ॐ पञ्चमावरण पूजां समर्पयामि

---

४६. ६ षष्ठावरण पूजा

ॐ मेशाय नमः ।
ॐ वृषभाय नमः ।
ॐ मिथुनाय नमः ।
ॐ कटकाय नमः ।
ॐ सिंहाय नमः ।
ॐ कन्यायै नमः ।
ॐ तुलायै नमः ।
ॐ वृश्चिकाय नमः ।
ॐ धनुषे नमः ।
ॐ मकराय नमः ।
ॐ कुंभाय नमः ।
ॐ मीनाय नमः ।
ॐ श्री अनन्तपद्मनाभ स्वामिने नमः ।
षष्ठावरण पूजां समर्पयामि

---

४६. ७ सप्तमावरण पूजा

ॐ ब्राह्म्यै नमः ।

ॐ माहेश्वर्यै नमः ।

ॐ कौमार्यै नमः ।

ॐ वैष्णव्यै नमः ।

ॐ वाराह्यै नमः ।

ॐ नारसिंहायै नमः ।

ॐ चामुण्डायै नमः ।

ॐ इन्द्राण्यै नमः ।

ॐ श्री अनन्तपद्मनाभ स्वामिने नमः ।

सप्तमावरण पूजां समर्पयामि

---

४६. ८ अष्टमावरण पूजा

ॐ मत्स्याय नमः ।

ॐ कूर्माय नमः ।

ॐ वराहाय नमः ।

ॐ नारसिंहाय नमः ।

ॐ वामनाय नमः ।

ॐ परशुरामाय नमः ।

ॐ रामाय नमः ।

ॐ कृष्णाय नमः ।

ॐ बुद्धाय नमः ।

ॐ कल्किने नमः ।

ॐ श्री अनन्तपद्मनाभ स्वामिने नमः ।

अष्टमावरण पूजां समर्पयामि

---

४७ Katha

When Pandava kings were banished for 12 years from their kingdom, and were in the jungle, Lord Krishna visits them. Yudhishtira, the eldest among them asks Lord Krishna an easy way out of all their difficulties.

Lord Krishna says "Yes there is a great vrata which destroys all your sins, removes all your difficulties, promotes your material prosperity and will eventually give you moksha(liberation) . The vrata is called Ananta Padmanabha vrata. This vrita needs to be done a day prior to pournami (भाद्रपद शुक्ल चतुर्दशि) of the month of bhadrapada. In respect of protecting devotees this vrata is reputed to be the foremost". Dharmaraja (Yudishtra) wants to know now who this Ananta represents; whether he is Adishesha or Taxaka, or Brahma.

Lord Krishna replies that Ananta is none other than He Himself; Ananta is the endless time. You can call him Hari, Vishnu, Krishna, Shiva, Surya, Adishesha or Brahma. Having resided in the hearts of all creatures, and assuming different Avatar for protecting the good and punishing the wicked, I am that Parameshwar Himself. In me reside all the 14 Lokas, 14 Indras, 12 Adityas, 11 Rudras, 8 Vasus, 7 Rishis,the Earth and the sky, rivers and mountains. Saying thus the Lord displays his Vishwaroopa to Dharmaraja.

Overwhelmed at seeing the Lord's Vishwaswaroopa, Dharmaraja wants to know more details of the Vrata; how to perform the Vrata, what benefits one gets and who all have done this Vrata earlier. The Lord now pleased narrates the story of this vrata which took place in Kritayuga.
There was a Brahmin called Sumanta born in Vasishta Gotra and who had married Brigu's daughter Dheeksha. They had a charming daughter called Susheela. When Susheela was a young girl, she lost her mother. Her father married a woman called Karkashe who was a hard hearted, quarrelsome, termagant. She made the life of Suheela miserable. In spite of these difficulties at home, Susheela grew to be a fine lady ready to be married. When Sumanta was worried over her marriage, there came to his house a Rishi called Kaundinya who was looking for a bride. Sumanta gives his daughter to Kaundiya rishi in marriage.

With his wife being uncooperative, he could give to his son in law only some fried wheat flour as a marriage gift.

Kaundinya accompanied by his wife Susheela travels and by afternoon reaches the bank of a river. That day being Bhadrapada Shukla Chaturdashi many Brahmins and their wives who were wearing red dress, were worshipping Ananta Padmanabha. Curious Susheela approaches these ladies and asks them for details of the vrata. They say that the Vrata is called Ananta Vrata and the fruits are infinite(अनन्त) ; when Susheela showed interest to do the Vrata, they tell Susheela the details as follows :

The Vrata is to be performed on Bhadrapada Shukla Chaturdashi. Having taken bath and wearing a clean dress, decorate the altar with devotion. Keep a kalasha on the south of the altar in which you invite the Lord. Keep 7 darbhas tied to each other to represent Ananta. Keep a red thread with 14 knots on the altar. Worship lord with 14 variety of flowers and 14 variety of leaves. The prasad for this vrata is Atiras. Make 28 of them and serve them to brahmanas. Those attendning should be given food and respect. Do this vrata for 14 years each year replacing the thread that was worn in the earlier year. In the 15th year do the udyapana (conclusion with donation of gifts to Brahmanas)

Having listened to the narration with attention, faith and devotion, Susheela performed the puja with those gathered there, distributed half of the fried wheat flour to brahmanas. She prepared a 'Thoran' (thread) mixed with turmeric powder with fourteen 'Grandhis' (knots), offered to the Lord and tied on left hand wrist for women and on right wrist on men and while winding up the Thoran, recited the following Mantra:

अनंत संसार महासमुद्रे मग्नान् समभ्युद्धर वासुदेव.
अनंत रुपे विनियोजितात्मा अनंत रूपाय नमो नमस्ते

(Vasudeva! I am drowning in this huge Ocean of Samsara; kindly liberate me from the depths of the Ocean and let me be absorbed me into you!).

Susheela wore the red thread and with the thoughts of Ananta Padmanabha, accompanied her husband to his ashram. Because of the power of Anantavrata, Kaundinya's ashram acquired beauty and wealth. All his relatives were eagerly waiting to do the Anantavrata. Susheela had acquired an aura of brilliance.

One day Kaundinya sees the red thread on Susheela's hand and asks for an explanation; In spite of her telling him the truth, in a fit of anger and jealousy, Kaundinya forcibly removes the thread and throws in the fire.Sushila picks up the half burnt thread and immerses it in milk. His behaviour proved very dear to Kaundinya; pretty soon all his wealth was lost; his relatives desert him; his cattle died and he now knows that this was on account of his rudeness to Ananta Padmanabha swami in the form of red thread.

Kaundinya leaves his house in search of Anantha padmanabha. Like a demented person he enters the jungle and asks a mango tree full of mangoes, have you seen Ananta Padmanabha swami? He goes further and asks a cow along with its calf the same question. A little further he meets a bullock to who he poses this question. His travel brings him near two lakes which were overflowing to whom he puts the same question. The next in line were a donkey and an elephant who could not answer his question. By now he was tired and heartbroken. He falls down there. Lord in His infinite compassion comes there in the form an old Brahman, revives him and takes him to a palace where he shows him his four armed form along with Mahalakshmi. Kaundinya praises the Lord in many stotras. The Lord please gives him three boons viz., Removal of poverty, ability to follow dharma, mukti saubhagya.

Now Kaundinya asks the Lord about the strange sights he saw on the way to Him. The Lord

explains. The man who was full of knowledge but did not teach his disciples and was useless became the mango tree. Although wealthy one who never ate himsef and did not give to others became this cow. The king who gave non productive lands as gifts is born now as a bullock. The two lakes which overflow are dharma and adharma. One whoneglected his ancestors' dharma has become an elephant. The donkey represents the person who condemned others and lived through unrighteous methods. Do this vrita for 14 years and I shall grant you a permanent place in the heavens.

Kaundinya returned home and did the puja with shraddha and bhakti. He lived a life of wealth and happiness. In the bygone days, sages like Agastya, kings like Janaka, Sagara, Dilipa, Harischandra have done this vrita. You too do this vrita and all your troubles will be over.

Listening to this the exiled king Dharmaraja also performed this vrita. One who hears this story or narrates it will be rid of all woes and difficulties and will acquire all kinds of wealth.

---

४८ अष्टोत्तर पूजा (chant dhyAna shloka)

ॐ शान्ताकारम् भुजगशयनम् पद्मनाभम् सुरेशम्।
विश्वाधारम् गगनसदृशम् मेघवर्णम् शुभाङ्गम्॥
लक्ष्मीकान्तम् कमलनयनम् योगिहृद्ध्यानगम्यम्।
वन्दे विष्णुम् भवभयहरम् सर्वलोकैकनाथम्॥

ॐ श्रीमद् अनन्ताय नमः ।
ॐ कृष्णाय नमः ।
ॐ अच्युताय नमः ।
ॐ पुरुषाय नमः ।
ॐ अनन्ताय नमः ।
ॐ साक्षिणे नमः ।
ॐ योगाय नमः ।
ॐ ज्ञानाय नमः ।
ॐ ज्ञानप्रियाय नमः ।

ॐ पद्मनाभाय नमः ।
ॐ पुरुषोत्तमाय नमः ।
ॐ प्रभवे नमः ।
ॐ ईश्वराय नमः ।
ॐ अधोक्षजाय नमः ।
ॐ पवित्राय नमः ।
ॐ मंगलाय नमः ।
ॐ श्रीगर्भाय नमः ।
ॐ प्रजापतये नमः ।

ॐ त्रिविक्रमाय नमः ।
ॐ सिद्धाय नमः ।
ॐ रावणच्छेदनाय नमः ।
ॐ महावीराय नमः ।
ॐ श्रीवत्सलाय नमः ।
ॐ धर्माय नमः ।
ॐ सृष्टिकर्त्रे नमः ।
ॐ संतुष्टाय नमः ।
ॐ वराहाय नमः ।

ॐ नारायणाय नमः ।
ॐ पूर्णाय नमः ।
ॐ औषधाय नमः ।
ॐ शाश्वताय नमः ।
ॐ श्रीपतये नमः ।
ॐ विभवे नमः ।
ॐ ज्येष्ठाय नमः ।

ॐ श्रेष्ठाय नमः |
ॐ विक्रमिणे नमः |

ॐ धन्विने नमः |
ॐ मेधाय नमः |
ॐ अजाय नमः |
ॐ पुण्याय नमः |
ॐ कालाय नमः |
ॐ वत्सलाय नमः |
ॐ विश्वाय नमः |
ॐ सनातनाय नमः |
ॐ रुद्राय नमः |

ॐ ब्रह्मणे नमः |
ॐ अमृताय नमः |
ॐ वेदांगाय नमः |
ॐ चतुरात्मने नमः |
ॐ भोक्त्रे नमः |
ॐ सुचये नमः |
ॐ अचंचलाय नमः |
ॐ इंद्राय नमः |
ॐ हरये नमः |

ॐ स्वर्गाय नमः |
ॐ अनन्तमूर्तये नमः |
ॐ मेधाय नमः |
ॐ वेद्याय नमः |
ॐ दर्पघ्ने नमः |
ॐ मायाय नमः |
ॐ मोहाय नमः |

ॐ सुरानंदाय नमः |
ॐ सागराय नमः |

ॐ तपसे नमः |
ॐ सिंहाय नमः |
ॐ मृगाय नमः |
ॐ लोकपालकाय नमः |
ॐ स्थिताय नमः |
ॐ अनन्तऔषधाय नमः |
ॐ दिक्पालकाय नमः |
ॐ धनुर्धराय नमः |
ॐ अम्बुजाय नमः |

ॐ वाक्याय नमः |
ॐ गुरवे नमः |
ॐ शोभनाय नमः |
ॐ वरश्रेष्ठाय नमः |
ॐ संवृताय नमः |
ॐ सम्प्रदाय नमः |
ॐ वह्नये नमः |
ॐ वायुवे नमः |
ॐ शिखराय नमः |

ॐ अनेकाय नमः |
ॐ आनर्तनाय नमः |
ॐ श्रीशाय नमः |
ॐ गुह्याय नमः |
ॐ कमलाय नमः |
ॐ दर्पघ्ने नमः |
ॐ अनन्तहस्ताय नमः |

ॐ अनन्त उदराय नमः |
ॐ अनन्तहृदयाय नमः |

ॐ अनन्तबाहवे नमः |
ॐ अनन्तमुखाय नमः |
ॐ अनन्तजिह्वाय नमः |
ॐ अनन्त दौंष्ट्राय नमः |
ॐ अनन्त चक्षसे नमः |
ॐ अनन्त शिरसे नमः |
ॐ दयानिधये नमः |
ॐ श्रोत्राय नमः |
ॐ मुकुटाय नमः |

ॐ अंबराय नमः |
ॐ अनघाय नमः |
ॐ परमपूरुषाय नमः |
ॐ हरिवल्लभाय नमः |
ॐ गुप्ताय नमः |
ॐ पुष्कराय नमः |
ॐ दृढाय नमः |
ॐ स्वर्णनाभाय नमः |
ॐ अनेकमूर्तये नमः |
ॐ श्री अनन्तपद्मनाभ देवताभ्यो नमः ।
इति अष्टोत्तर पूजां समर्पयामि ।।

---

४९ धूपं
वनस्पत्युद्भवो दिव्यो गन्धद्यो गन्ध उत्तमः |
अनन्तपद्मनाभ महीपालो धूपोयं प्रतिगृह्यतां ||

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू कावूरू पादावुच्येते ।।
ॐ श्री अनन्तपद्मनाभाय नमः | धूपं आघ्रापयामि||

---

५० दीपं
साज्यं त्रिवर्ति सम्युक्तं वह्निना योजितुम् मया |
गृहाण मङ्गलं दीपं त्रैलोक्य तिमिरापहम् ||
भक्त्या दीपं प्रयश्चामि देवाय परमात्मने ।
त्राहि मां नरकात् घोरात् दीपं ज्योतिर्नमोस्तुते ।।

ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः ।
उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ।।
ॐ श्री अनन्तपद्मनाभाय नमः | दीपं दर्शयामि ||

---

५१ नैवेद्यं
(dip finger in water and write a square and 'shrii' mark inside the square. Place naivedya on 'shrii'| remove lid and sprinkle water around the vessel; place in each food item one washed tulsi leaf or flower or akshata)

ॐ अनन्ताय विद्महे । पद्मनाभाय धीमहि ।
तन्नो विष्णु प्रचोदयात् ।।

ॐ श्री अनन्तपद्मनाभाय नमः | (show mudras)

निर्वीषी करणार्थे तार्क्ष मुद्रा |
अमृती करणार्थे धेनु मुद्रा |
पवित्री करणार्थे शंख मुद्रा |
संरक्षणार्थे चक्र मुद्रा |
विपुलमाय करणार्थे मेरु मुद्रा |

(Touch naivedya and chant 9 times)'ॐ'

ॐ सत्यंतवर्तेन परिषिंचामि
(sprinkle water around the naivedya)
भोः! स्वामिन् भोजनार्थं आगच्छादि विज्ञाप्य |
(request Lord to come for dinner)

सौवर्णे स्थालिवैर्ये मणिगण खचिते गोघृतां
सुपक्वां भक्ष्यां भोज्यां च लेह्यानपि
सकलमहं जोष्यम्न नीधाय नाना शाकैरूपेतं
समधु दधि घृतं क्षीर पानीय युक्तं
तांबूलं चापि विष्णु प्रतिदिवसमहं मनसा चिंतयामि ||
अद्य तिष्ठति यत्किञ्चित् कल्पितश्चापरंग्रिहे
पक्वान्नं च पानीयं यथोपस्कर संयुतं
यथाकालं मनुष्यार्थे मोक्ष्यमानं शरीरिभिः
तत्सर्वं विष्णुपूजास्तु प्रयतां मे जनार्दन
सुधारसं सुविपुलं आपोषणमिदं
तव गृहाण कलशानीतं यथेष्टमुपभुज्ज्यताम् ||

ॐ नमो नारायणाय । श्री लक्ष्मी नारायणाय नमः।।
अमृतोपस्तरणमसि स्वाहाः |
(drop water from shankha)

ॐ प्राणात्मने नारायणाय स्वाहा ।
ॐ अपानात्मने वासुदेवाय स्वाहा ।
ॐ व्यानात्मने सङ्कर्षणाय स्वाहा ।
ॐ उदानात्मने प्रद्युम्नाय स्वाहा ।
ॐ समानात्मने अनिरुद्धाय स्वाहा ।

ॐ नमः अनन्तपद्मनाभाय ।

नैवेद्यं गृह्यतां देव भक्ति मे अचलां कुरुः ।
ईप्सितं मे वरं देहि इहत्र च परां गतिम् ।।
श्री अनन्तपद्मनाभ नमस्तुभ्यम् महा नैवेद्यं उत्तमम्|
संगृहाण सुरश्रेष्ठिन् भक्ति मुक्ति प्रदायकम् ||

ॐ चन्द्रमा मनसो जातः चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ।।

ॐ आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् |
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ||

ॐ नमो नारायणाय ।
श्री लक्ष्मीसहित अनन्त पद्मनाभाय नमः ।
नैवेद्यं समर्पयामि ।।
(cover face with cloth and chant gayatri mantra five times or repeat 12 times श्री अनन्तपद्मनाभाय नमः)

सर्वत्र अमृतोपिधान्यमसि स्वाहाः ||
ॐ श्री लक्ष्मीसहित अनन्त पद्मनाभाय नमः ।
उत्तरापोषणं समर्पयामि ||

(let flow water from shankha)

---

५२ महा फलं
(put tulsi / axathaa on a big fruit)
इदं फलं मयादेव स्थापितं पुरतस्तव |
तेन मे सफलावाप्तिर्भवेत् जन्मनि जन्मनि ||
ॐ श्री अनन्तपद्मनाभाय नमः | महाफलं समर्पयामि |

---

५३ फलाष्टक (put tulsi/akshata on fruits)

कूष्माण्ड मातुलिङ्गं च कर्कठी दाडिमी फलम् |
रम्भा फलं जम्बीरं बदरं तथा ||
ॐ श्री अनन्तपद्मनाभाय नमः | फलाष्टकं समर्पयामि ||

---

५४ करोद्वर्तन

करोद्वर्तनकं देव मया दत्तं हि भक्तितः |
चारु चंद्र प्रभां दिव्यं गृहाण जगदीश्वर ||
ॐ श्री अनन्तपद्मनाभाय नमः | करोद्वर्तनार्थे चंदनं समर्पयामि ||

---

५५ तांबूलं

पूगीफलं सतांबूलं नागवल्लि दलैर्युतम् |
ताम्बूलं गृह्यतां देव येल लवङ्ग सम्युक्तम् ||
ॐ श्री अनन्तपद्मनाभाय नमः | पूगीफल ताम्बूलं समर्पयामि ||

---

५६ दक्षिणा

हिरण्य गर्भ गर्भस्थ हेमबीज विभावसोः |
अनन्त पुण्य फलदा अथः शान्तिं प्रयच्छ मे ||
ॐ श्री अनन्तपद्मनाभाय नमः | सुवर्ण पुष्प दक्षिणां समर्पयामि ||

---

५७ महा नीराजन

ॐ श्रियै जातः श्रिय अनिरियाय श्रियं वयो जरितृभ्यो ददाति
श्रियं वसाना अमृतत्वमायन् भवंति सत्य स मिथामितद्रौ
श्रिय एवैनं तत् श्रियामादधाति संततमृचा वषट्कृत्यं संतत्यै संधीयते प्रजया पशुभिः य एवं वेद ||
ॐ श्री अनन्तपद्मनाभाय नमः| महानीराजनं दीपं समर्पयामि ||

---

५८ कर्पूर दीप

अर्चत प्रार्चत प्रियमेधासो अर्चत |
अर्चन्तु पुत्रका उत पुरं धृष्णवर्चत ||

कर्पूरकं महाराज रंभोद्भूतं च दीपकम् |
मङ्गलार्थं महीपाल सङ्गृहाण जगत्पते ||

ॐ श्री अनन्तपद्मनाभाय नमः | कर्पूर दीपं समर्पयामि||

---

५९ आरती

ॐ जय जगदीश हरे स्वामी जय जगदीश हरे
भक्त जनों के संकट, दास जनों के संकट,
क्षण में दूर करे, ॐ जय जगदीश हरे

जो ध्यावे फल पावे, दुख बिनसे मन का
स्वामी दुख बिनसे मन का
सुख सम्मति घर आवे, सुख सम्मति घर आवे,
कष्ट मिटे तन का, ॐ जय जगदीश हरे

मात पिता तुम मेरे, शरण गहूं मैं किसकी
स्वामी शरण गहूं मैं किसक .
तुम बिन और न दूजा, तुम बिन और न दूजा,
आस करूं मैं जिसकी. ॐ जय जगदीश हरे

तुम पूरण परमात्मा, तुम अंतरयामी
स्वामी तुम अंतरयामी
पारब्रह्म परमेश्वर, पारब्रह्म परमेश्वर,
तुम सब के स्वामी, ॐ जय जगदीश हरे

तुम करुणा के सागर, तुम पालनकर्ता
स्वामी तुम पालनकर्ता,
मैं मूरख खल कामी, मैं सेवक तुम स्वामी,
कृपा करो भर्ता, ॐ जय जगदीश हरे

तुम हो एक अगोचर, सबके प्राणपति,
स्वामी सबके प्राणपति,
किस विधि मिलूं दयामय, किस विधि मिलूं कृपामय,
तुमको मैं कुमति, ॐ जय जगदीश हरे

दीनबंधु दुखहर्ता, तुम रक्षक मेरे,
स्वामी तुम रक्षक मेरे,
अपने हाथ उठाओ, अपने शरण लगाओ
द्वार पड़ा तेरे, ॐ जय जगदीश हरे

विषय विकार मिटाओ, पाप हरो देवा,
स्वामी पाप हरो देवा,.
श्रद्धा भक्ति बढ़ाओ, श्रद्धा प्रेम बढ़ाओ,
संतन की सेवा, ॐ जय जगदीश हरे

'ॐ जय जगदीश हरे, स्वामी जय जगदीश हरे
भक्त जनों के संकट, दास जनों के संकट,
क्षण में दूर करे, ॐ जय जगदीश हरे

जो ध्यावे फल पावे, दुख बिनसे मन का
स्वामी दुख बिनसे मन का
सुख सम्पति घर आवे, सुख सम्पति घर आवे,
कष्ट मिटे तन का, ॐ जय जगदीश हरे

मात पिता तुम मेरे, शरण गहूं मैं किसकी
स्वामी शरण गहूं मैं किसकी
तुम बिन और न दूजा, तुम बिन और न कोयी,
आस करूं मैं जिसकी, ॐ जय जगदीश हरे

तुम पूरण परमात्मा, तुम अंतरयामी
स्वामी तुम अंतरयामी
पारब्रह्म परमेश्वर, पारब्रह्म परमेश्वर,
तुम सब के स्वामी, ॐ जय जगदीश हरे

तुम करुणा के सागर, तुम पालनकर्ता
स्वामी तुम पालनकर्ता,
मैं मूरख खल कामी, मैं सेवक तुम स्वामी,
कृपा करो भर्ता, ॐ जय जगदीश हरे

ॐ जय जगदीश हरे, स्वामी जय जगदीश हरे
भक्त जनों के संकट, दास जनों के संकट,
क्षण में दूर करे, ॐ जय जगदीश हरे'

---

६० प्रदक्षिणा

ॐ नाभ्या आसीदन्तरिक्षम् शीर्ष्णो द्यौः समवर्तत ।
पदभ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयन्।।

आर्द्रां यःकरिणीं यष्टिं पिङ्गलां पद्ममालिनीम् |
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ||

यानि कानि च पापानि जन्मांतर कृतानि च |
तानि तानि विनश्यन्ति प्रदक्षिण पदे पदे ||
अन्यथा शरणं नास्ति त्वमेव शरणं मम |
तस्मात् कारुण्य भावेन रक्ष रक्ष रमापते ||
ॐ श्री अनन्तपद्मनाभाय नमः | प्रदक्षिणान्
समर्पयामि||

----

६१ नमस्कार

सप्तास्यासन् परिधयः त्रिस्सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वानाः अबध्नन्पुरुषं पशुम् ।

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् |
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ||
नमः सर्व हितार्थाय जगदाधार हेतवे |
साष्टाङ्गोयं प्रणामस्ते प्रयत्नेन मया कृतः |
ऊरूसा शिरसा दृष्ट्वा मनसा वाचसा तथा |
पद्भ्यां कराभ्यां जानुभ्यां प्रणामोष्टाङ्गं उच्यते ||
शात्येनापि नमस्कारान् कुर्वतः शार्ङ्गपाणये |
शत जन्मार्चितम् पापम् तत्क्षणमेव नश्यति ||
ॐ श्री अनन्तपद्मनाभाय नमः | नमस्कारान्
समर्पयामि ||

६१.१ चतुर्दश नमस्कारः

(Offer 14 prostrations at the chant of 14 names of shrii ananthapadmanAbha from ashtothara)

ॐ श्रीमद् अनन्ताय नमः | चतुर्दश नमस्कारान्
समर्पयामि ||

----

६२ राजोपचार

गृहाण परमेशान सरत्ने छत्र चामरे |
दर्पणं व्यजनं चैव राजभोगाय यत्नतः ||
ॐ श्री अनन्तपद्मनाभाय नमः | छत्रं समर्पयामि ||
ॐ श्री अनन्तपद्मनाभाय नमः | चामरं समर्पयामि||
ॐ श्री अनन्तपद्मनाभाय नमः | गीतं समर्पयामि ||
ॐ श्री अनन्तपद्मनाभाय नमः | नृत्यं समर्पयामि ||
ॐ श्री अनन्तपद्मनाभाय नमः | वाद्यं समर्पयामि ||
ॐ श्री अनन्तपद्मनाभाय नमः | दर्पणं समर्पयामि||
ॐ श्री अनन्तपद्मनाभाय नमः | व्यजनं
समर्पयामि||
ॐ श्री अनन्तपद्मनाभाय नमः | आन्दोलनं
समर्पयामि||
ॐ श्री अनन्तपद्मनाभाय नमः | राजोपचारान्
समर्पयामि ||
ॐ श्री अनन्तपद्मनाभाय नमः | सर्वोपचारान्
समर्पयामि ||
ॐ श्री अनन्तपद्मनाभाय नमः | समस्त
राजोपचारार्थे अक्षतान् समर्पयामि ||

----

६३ मंत्र पुष्प

यज्ञेन यज्ञमयजन्त देवाः
तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्ते
यत्र पूर्वे साध्याः सन्ति देवाः ।।
यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् |
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ||
विद्या बुद्धि धनेश्वर्य पुत्र पौत्रादि संपदः |
पुष्पांजलि प्रदानेन देहिमे ईप्सितं वरम् ||

नमो (अ)स्तु अनंताय सहस्र मूर्तये सहस्र पादाक्षि शिरोरु बाहवे ।
सहस्र नाम्ने पुरुषाय शाश्वते सहस्र कोटी युगधारिणे नमः ।।

ॐ नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः ।
यजां देवान्यदि शक्नवाम मा ज्यायसः शंसमावृक्षि देवाः ।।
ॐ ममत्तु नः परिज्मा वसर्हा ममत्तु वातो अपां वृषण्वान् ।
शिशीतमिन्द्रापर्वता युवं नस्तन्नो विश्वे वरिवस्यन्तु देवाः ॥
ॐ कथा तेअग्ने शुचयन्त आयोर्ददाशुर्वाजेभिराशुषाणाः।
उभे यत्तोके तनये दधाना ऋतस्य सामन्नणयन्त देवाः ॥

ॐ राजाधि राजाय प्रसह्य साहिने
नमो वयं वैश्रवणाय कूर्महे
समे कामान् काम कामाय मह्यं
कामेश्वरो वैश्रवणो दधातु
कुबेराय वैश्रवणाय महाराजाय नमः ।।
ॐ स्वस्ति साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं
पारमेष्ठां राज्यं महाराज्यमाधिपत्यमयं समंत
पर्यायी स्यात् सार्वभौमः सार्वायुष आंतादा
परार्धात् पृथिव्यै समुद्रपर्यंताया एकराळिति तदप्येषः
श्लोकोऽभिगीतो मरूतः परिवेष्टारो मरुतस्या वसन्
ग्रहे आवीक्षितस्य कामप्रेर्विश्वेदेवा सभासद इति ||

ॐ श्री अनन्तपद्मनाभाय नमः |मंत्रपुष्पं समर्पयामि||

---

६४ शङ्ख ब्रमण
(make three rounds of shankha with water like arati and pour down; chant ॐ 9 times and show mudras)

इमां आपशिवतम इमं सर्वस्य भेषजे |
इमां राष्ट्रस्य वर्धिनि इमां राष्ट्र भ्रतोमत ||

---

६५ डोर ग्रहणं (accepting the thread)

स्वीकरोमि शुभं सूत्रम् अज्ञानं च हरम् परं
डोररूपेण मा रक्ष पुराण पुरुषोत्तम

डोर बन्दनं (tie the thread)

संसार सागरगुहां सुसुखम् विहर्तुम्
वाञ्छन्ति ये कुरुकुलोद्भव शद्धसत्वाः
सम्पूज्य च त्रिभुवनेशमनन्त देवं
बन्धन्ति दक्षिणकरे वर दोरकम् मे
अनन्त गुणरत्नाय विश्वरूपधराय च
सूत्र ग्रन्तिशु सम्स्ताप्य श्री अनन्ताय नमो नमः

पूर्व डोर विसर्जनम् (removing the old thread)

विसर्जयामि देवेश सूत्रंपूर्वं ध्रतंपरं
सम्पूर्ण व्रतमस्त्वद्य देव देव नमोस्तुते

विसर्जित् डोर नमस्कारः

(offering respects to the previous thread)
(chant १४ names of ananta padmanAbha from ashtothara)

---

६६ तीर्थ प्राशन

ॐ श्रियः कान्ताय कल्याण निधये निधयेऽर्थिनां ।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम्॥

सर्वदा सर्व कार्येषु नास्ति तेषां अमङ्गलम् ।
येषां हृदयिस्थो भगवान् मङ्गलायतनो हरिः ।।

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषां इन्दीवर श्यामो हृदयस्तो जनार्दनः ।।

अकाल मृत्यु हरणं सर्व व्याधि निवारणम् |
सर्व पाप उपशमनम् विष्णु पादोदकं शुभम् ||

---

६७ उपायन दानं

ब्राह्मण सुहासिनि पूजा
(wash feet wipe offer gandha, kumkum, flowers, fruits and gifts and make obeisances)

इष्ट काम्यार्थ प्रयुक्त सम्यग् आचरित श्री अनन्त पद्मनाभ व्रत सम्पूर्ण फल वाप्यर्थं
श्री अनन्तपद्मनाभ स्वरूपाय ब्राह्मणाय वायन दानं करिष्ये ।।

श्री अनन्तपद्मनाभ स्वरूपाय ब्राह्मणाय आवाहन पूर्वक आसनं गन्ध अक्षत धूप दीपादि सकलाराधनै स्वर्चितम्

नारायण प्रतिगृह्णातु नारायणो वै ददाति च
नारायणो तारकोभ्यां नारायणाय नमो नमः ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
अग्नेस्तेजसा सूर्यश्च अर्चसेन्द्रस्यं
इन्द्रियेनाभिशिञ्चामि ।।

बलाय श्रियै यश सेन्नद्याय श्री
अनन्तपद्मनाभस्वामिने नमः ।
वायनदानं प्रतिगृह्णातु (प्रतिगृह्णा विलाति प्रतिवचनं)

---

६८ विसर्जन पूजा

आराधितानां देवतानां पुनः पूजां करिष्ये ||
श्री अनन्तपद्मनाभ स्वामि देवताभ्यो नमः ।।

पुनः पूजा

ॐ शान्ताकारम् भुजग शयनं, पद्मनाभम् सुरेशं
विश्वाधरम् गगन सदृशम् मेघ वर्णं शुभान्गं
लक्ष्मीकान्तम् कमलनयनं, योगिभिर् ध्यान गम्यं
वन्दे विष्णुं भवबयहूं, सर्व लोकैक नाथं

ॐ श्री अनन्तपद्मनाभाय नमः । ध्यायामि, ध्यानं समर्पयामि ।
ॐ श्री अनन्तपद्मनाभाय नमः । आवाहयामि ।
ॐ श्री अनन्तपद्मनाभाय नमः । आसनं समर्पयामि।
ॐ श्री अनन्तपद्मनाभाय नमः । पाद्यं समर्पयामि।
ॐ श्री अनन्तपद्मनाभाय नमः । अर्घ्यं समर्पयामि।

ॐ श्री अनन्तपद्मनाभाय नमः। आचमनीयं समर्पयामि।
ॐ श्री अनन्तपद्मनाभाय नमः । पञ्चामृत स्नानं समर्पयामि ।
ॐ श्री अनन्तपद्मनाभाय नमः । महा अभिषेकं समर्पयामि ।
ॐ श्री अनन्तपद्मनाभाय नमः। वस्त्रयुग्मं समर्पयामि।
ॐ श्री अनन्तपद्मनाभाय नमः। यज्ञोपवीतं समर्पयामि।
ॐ श्री अनन्तपद्मनाभाय नमः । गन्धं समर्पयामि।
ॐ श्री अनन्तपद्मनाभाय नमः । नाना परिमल द्रव्यं समर्पयामि ।
ॐ श्री अनन्तपद्मनाभाय नमः । हस्तभूषणं समर्पयामि।
ॐ श्री अनन्तपद्मनाभाय नमः ।अक्षतान् समर्पयामि।
ॐ श्री अनन्तपद्मनाभाय नमः । पुष्पं समर्पयामि ।
ॐ श्री अनन्तपद्मनाभाय नमः । नाना अलंकारं समर्पयामि ।
ॐ श्री अनन्तपद्मनाभाय नमः । अंग पूजां समर्पयामि।
ॐ श्री अनन्तपद्मनाभाय नमः। पुष्प पूजां समर्पयामि।
ॐ श्री अनन्तपद्मनाभाय नमः । पत्र पूजां समर्पयामि।
ॐ श्री अनन्तपद्मनाभाय नमः । आवरण पूजां समर्पयामि ।
ॐ श्री अनन्तपद्मनाभाय नमः । अष्टोत्तर पूजां समर्पयामि ।
ॐ श्री अनन्तपद्मनाभाय नमः । धूपं आघ्रापयामि
ॐ श्री अनन्तपद्मनाभाय नमः । दीपं दर्शयामि
ॐ श्री अनन्तपद्मनाभाय नमः । नैवेद्यं समर्पयामि।
ॐ श्री अनन्तपद्मनाभाय नमः। महा फलं समर्पयामि।
ॐ श्री अनन्तपद्मनाभाय नमः। फलाष्टकं समर्पयामि।
ॐ श्री अनन्तपद्मनाभाय नमः । करोद्वर्थनकं समर्पयामि ।
ॐ श्री अनन्तपद्मनाभाय नमः । ताम्बूलं समर्पयामि।
ॐ श्री अनन्तपद्मनाभाय नमः । दक्षिणां समर्पयामि।
ॐ श्री अनन्तपद्मनाभाय नमः । महा नीराजनं समर्पयामि ।
ॐ श्री अनन्तपद्मनाभाय नमः। कर्पूर दीपं समर्पयामि।
ॐ श्री अनन्तपद्मनाभाय नमः। प्रदक्षिणां समर्पयामि।
ॐ श्री अनन्तपद्मनाभाय नमः । नमस्कारान् समर्पयामि ।
ॐ श्री अनन्तपद्मनाभाय नमः। राजोपचारं समर्पयामि।
ॐ श्री अनन्तपद्मनाभाय नमः । मन्त्रपुष्पं समर्पयामि।

पूजांते छत्रं समर्पयामि | चामरं समर्पयामि |
नृत्यं समर्पयामि | गीतं समर्पयामि |
वाद्यं समर्पयामि | आंदोलिक आरोहणं समर्पयामि|
अश्वारोहणं समर्पयामि | गजारोहणं समर्पयामि |
ॐ श्री अनन्तपद्मनाभाय नमः | समस्त राजोपचार देवोपचार शक्त्युपचार भक्त्युपचार पूजां समर्पयामि||

---

६९ आत्म समर्पण

यस्य स्मृत्या च नाम्नोक्त्या तपः पूजा क्रियादिषु |
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तं अच्युतम् ||
अनेन मया कृतेन, श्रीअनन्तपद्मनाभ देवता सुप्रीता सुप्रसन्ना वरदा भवतु ||
मध्ये मन्त्र तन्त्र स्वर वर्ण न्यूनातिरिक्त लोप दोष प्रायश्चित्तार्थं अच्युत अनन्त गोविंद नामत्रय महामन्त्र जपं करिष्ये ||
ॐ अच्युताय नमः । ॐ अनंताय नमः । ॐ गोविंदाय नमः ।
ॐ अच्युताय नमः । ॐ अनंताय नमः । ॐ गोविंदाय नमः ।
ॐ अच्युताय नमः । ॐ अनंताय नमः । ॐ गोविंदाय नमः ।
ॐ अच्युतानन्तगोविन्देभ्यो नमः ||
मन्त्रहीनम्, क्रियाहीनम्, भक्तिहीनम् जनार्दन |
यत् पूजितम् मयादेव परिपूर्णम् तदस्तु मे ||
कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृति स्वभावात् |
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ||
नमस्करोमि | श्री अनन्तपद्मनाभ स्वामी देवता प्रसादं शिरसा गृहणामि ||

---

७० क्षमापनं

अपराध सहस्राणि क्रियन्ते अहर्निशं मया |
तानि सर्वाणि मे देव क्षमस्व पुरुषोत्तम ||

यान्तु देव गणाः सर्वे पूजां आदाय पार्थिवीम् |
इष्ट काम्यार्थ सिद्ध्यर्थं पुनरागमनाय च ||
(shake the kalasha)

Puja Text – Sri S.A.Bhandarkar
Transliterated by Sowmya Ramkumar
Send corrections to
(somsram[at]gitaaonline.com)
Last updated on Apr 24, 2013